UNIVERSITY OF TORONTO
3 1761 00382030 5

Ajita Prabhācārya
Śāntināthacaritram

BL
1373
S45 A6
1909
v.2

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No 1227.



श्रीशान्तिनाथचरित्रम् ।

ÇRĪ ÇĀNTINĀTHA ÇARITRA

BY

ÇRĪ AJITA PRABHĀÇĀRYA.

EDITED BY

MUNI INDRAVIJAYA

DISCIPLE OF

ÇĀSTRA VIÇARADA JAINĀCĀRYA

ÇRĪ VIJAYA DHARMA SŪRI.

FASCICULUS II.

Calcutta,

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL, 57, PARK STREET.

1909.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 57, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, Mr. BERNARD QUARITCH,

11, Grafton Street, New Bond Street, London, W., and Mr. Otto HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

•Advaita Brahma Siddhi, Fasc. 2, 4 @ /10/ each	Rs.	1 4
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each		1 14
*Agni Purāṇa, Fasc. 6-14 @ /10/ each		5 0
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-5 ; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each		14 6
Aitereya Lochana.		2 0
•Aṇu Bhāṣhya, Fasc. 2-5 @ /10/ each		2 8
Aphorisms of Sāṇḍilya, (English) Fasc. 1 @ 1/-		1 0
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each		3 12
*Atharvana Upanishad, Fasc 4-5 @ /10/ each		1 4
Atmatattaviveka, Fasc. I. @ /10/ each		0 10
Açvavaidyaka, Fasc. 1-5 @ /10/ each		3 2
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-6 ; Vol. II. Fasc. 1-5 @ 1/ each		11 0
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol 2, Fasc. 1 @ /10/ each		1 14
Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fase 1-2 @ /10/ each ...		3 2
*Bhāmatī, Fasc. 4-8 @ /10/ each		3 2
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-6 ; Vol. 2, Fasc. 1, @ /10 each ...		4 0
Baudhyostatrasangraha		2 8
Brahma Sutra, Fasc. 1 @ /10/ each		0 10
Bṛhaddēvatā Fasc. 1-4 @ /10/ each		2 8
Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each		3 12
Bodhicaryāvatāra of Çāntideva, Fasc. 1-5 @ /10/ each		3 0
Cri Cantinatha Charita, Fasc. I		0 14
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each		1 ..
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each		8 ..
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. 1-5, Vol. III, Fasc. 1-7 Vol. 5, Fasc. 1-4 @ /10/ each		14 ..
Ditto Vol. 6, Fasc. 1-3 @ 1/4/ each		3 ..
Ditto Vol. VII, Fasc. 1-3 @ /10/		1 1
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1-12 @ /10/ each		7 ..
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25 ; Vol. III. Part I, Fasc. 1-18. Part II, Fasc. 1-10. Vol. IV. Fasc. 1-6 @ /10/ each		36 1
Ditto Vol. 4, Fasc. 7, @ 1/4/ each		1 ..
Ditto Vol. IV, Fasc. 8, @ /10/		0 10
Clockavartika, (English) Fasc. 1-7 @ 1/4/ each		8 12
*Çrauta Sūtra of Āpastamba, Fasc. I-17 @ /10/ each		3 12
Ditto Çānkhāyana, Vol. I, Fasc. 1-7 ; Vol. II, Fasc. 1-4, Vol. III, Fasc. 1-4 ; Vol 4, Fasc. 1 @ /10/ each		10 ..
Çrī Bhāshyam, Fasc 1-3 @ /10/ each		1 1
Dāna Kriyā kaumudī, Fasc 1-2 @ /10/ each		1 ..
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ /10/ each		4 ..
Ditto Āchārasārah Vol. II, Fasc. 1-4 @ /10/ each		3 ..
Gobhiliya Grihya Sutra, Vol. I. @ /10/ each		3 ..
Ditto Vol. II. Fasc. -2 @ 1/4/ each		2 ..
Haralata		1 1
Karmapradiph, Fasc. I		1 ..
Kāla Viveka, Fasc. 1-7 @ /10/ each		4 ..
Kātantra, Fasc. 1-6 @ /12/ each		4 ..
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ 1/4/ each		17 ..
*Kūrma Purāṇa, Fasc. 3-9 @ /10/ each		4 ..
Lalita-Vistara, (English) Fasc. 1-3 @ 1/- each		3 ..
Madana Pārijāta, Fasc. 1-11 @ /10/ each		6 ..
Mahā-bhāṣya-pradīpōdyōta, Vol. I, Fasc. 1-9 ; Vol. II, Fasc. 1-12 Vol. III, Fasc. 1-9 @ /10/ each		18 ..
Manuṭīkā Sangraha, Fasc. 1-3 @ /10/ each		1 ..

एकदाऽमरदत्तेन प्रणुन्नोन्नतिकाऽथ सा ।
वटोद्दङ्कस्य चौरस्य प्रविवेश मुखान्तरे ॥ ६२ ॥
मित्रानन्दो हसन्नूचे पश्याहो महदद्भुतम् ।
विवेशाडोलिकाऽ[1]कस्माच्छवस्य वदने कथम् ॥ ६३ ॥
भणितः कुपितेनैष[2] मित्रानन्द ! तवाप्यरे ।
अतैवोन्नम्रितस्याऽऽस्येऽवश्यं वेक्ष्यत्यडोलिका ॥ ६४ ॥
तच्छ्रुत्वा मृत्युभीतोऽसौ निरानन्दागयोऽवदत् ।
पतिताऽडोलिका यस्मान्मृतकस्य मुखे सखे ॥ ६५ ॥
जातेयमशुचिस्पृष्टा तदलं क्रीडयाऽनया ।
प्रत्यूचेऽमरदत्तस्तं ममास्त्यन्याप्यडोलिका ॥ ६६ ॥ (युग्मम्)
इति प्रोक्तेऽपि[3] तं क्रीडाविमुखं प्रेक्ष्य भाववित् ।
आगादमरदत्तोऽसौ मित्रानन्दस्य[4] मन्दिरम् ॥ ६७ ॥
द्वितीये दिवसेऽप्येनं दृष्ट्वा श्यामसुखाम्बुजम् ।
पप्रच्छेत्यमरो मित्रं किं ते दुःखस्य कारणम् ॥ ६८ ॥
अतिनिर्बन्धपृष्टेन तेनाप्यस्य निवेदितम् ।
तच्छ्रवस्य वचो येन गोप्यं स्यान्न सुहृज्जने ॥ ६९ ॥
तन्निगम्यामरः स्माह शवा जल्पन्ति न क्वचित् ।
तदियं व्यन्तरक्रीडा सम्यक् विज्ञायते न तु[5] ॥ ७० ॥

---

(१) च द यस्मान्मृतकस्य मुखे सखे ।
(२) ङ यं ।
(३) ङ द -क्रोऽपि ।
(४) घ च ऊ -स्य ।
(५) ङ हि ।

BL
1373
S45A2
1904
V.2

इदं सत्यमसत्यं वा परिहासवचो ऽथवा ।
कार्यः पुरुषकारो हि तथापि पुरुषेण भोः ॥ ७१ ॥
मित्रानन्दोऽवदद्दैवायत्ते किं नाम पौरुषम् ।
प्रत्यूचे चामरस्तं नाश्रौषीत्किन्तु भवानदः ॥ ७२ ॥
आपत् निमित्तदृष्टाऽपि जीवितान्तविधायिनी ।
शान्ता पुरुषकारेण ज्ञानगर्भस्य मन्त्रिणः ॥ ७३ ॥
ज्ञानगर्भः स को मन्त्रीति मित्रेणोदितः पुनः ।
अमरः कथयामास तदग्रे तत्कथामिति ॥ ७४ ॥
अस्त्यत्र भरते धान्यधनर्ध्या बन्धुरा पुरी ।
चम्पेति पृथिवीख्याता [1]लङ्कायाः सदृशा गुणैः ॥ ७५ ॥
जितशत्रुर्नृपस्तत्राभवत्कीर्तियशोनिधिः ।
दृप्तार्यनेककुम्भीन्द्रकुम्भपाटनकेसरी ॥ ७६ ॥
राज्ये सर्वेश्वरस्तस्याभवन्मन्त्री पुरोदितः ।
बुद्ध्याऽवगणितो येन गुरुः स्वर्गौकसामपि ॥ ७७ ॥
भार्या गुणावली तस्य पुत्रस्तत्कुक्षिसम्भवः ।
सुबुद्धिनामा तस्याभूत् रूपश्रीविजितस्मरः ॥ ७८ ॥
उपविष्टोऽन्यदाऽऽस्थाने नृपमण्डलसेवितः ।
सहितो मन्त्रिवर्गेण यावदासीन्महीपतिः ॥ ७९ ॥
आययौ तावदष्टाङ्गनिमित्तज्ञानपण्डितः ।
नृपपर्षदि ना कश्चित् प्रतीहारनिवेदितः ॥ ८० ॥

---

(१) ङ च छ ज्लकायाः ।

दत्तागोर्वचनः सोऽथोपविष्टो विष्टरे वरे ।
कियज्ज्ञानं तवास्तीति पृष्टो राज्ञेत्यभाषत ॥ ८१ ॥
राजन् ! लाभमलाभं च जीवितं मरणं तथा ।
सुखं दुःखं च जानामि गमनागमनं नृणाम् ॥ ८२ ॥
राजोचे मत्परीवारमध्ये त्वं यस्य कस्यचित् ।
पश्यस्यत्यद्भुतं किञ्चित् पृच्छान्तस्तन्निवेदय ॥ ८३ ॥
नैमित्तिकोऽवदत्तर्हि ज्ञानगर्भस्य मन्त्रिणः ।
पश्यामि सकुटुम्बस्योपसर्गं मारणात्मकम् ॥ ८४ ॥
तच्छ्रुत्वा पीडितो राजा राजलोकस्तथाऽखिलः ।
अन्तर्दूनोऽपि मन्त्री तु सावहित्थो ययौ गृहम् ॥ ८५ ॥
नैमित्तिकं महानीय तमपृच्छद्रहस्यदः ।
अयि भद्र ! कुतो हेतोरापदं मम पश्यसि ॥ ८६ ॥
तेनापि तस्य माऽऽख्याता भाविनी ज्येष्ठनन्दनात् ।
विसृष्टो ज्ञानगर्भेण सत्कृत्य ज्ञान्यसौ ततः ॥ ८७ ॥
अभाणि तनयस्यैवं ममाऽऽदेशं करोषि चेत् ।
आपन्निस्तीर्यते वत्स ! तदियं जीवितान्तकृत् ॥ ८८ ॥
यदादिशसि मे तात ! कृत्यं खेतमथामितम् ।
तदवश्यं मया कार्यमित्यूचे विनयी स तु ॥ ८९ ॥
ततः पुरुषमानायां मञ्जूषायां महामतिः ।
सचिवस्तं निचिक्षेप नीराहारादिसंयुतम् ॥ ९० ॥
दत्ताष्टतालकां तां च महीभर्तुः समार्पयत् ।
देवेदं मम सर्वस्वं रक्ष्यं चेति व्यजिज्ञपत् ॥ ९१ ॥

राजा प्रोवाच हे मन्त्रिन्निदं धर्मे नियोज्यताम् ।
विना भवन्तमेतेन धनेनाहं करोमि किम् ॥ ९२ ॥
भूयोऽपि सचिवः स्माऽऽह धर्मोऽयं हि नियोगिनाम् ।
यदार्यो वञ्च्यते नैव विपद्यपि धनादिना ॥ ९३ ॥
ततो राज्ञा प्रपन्नं तत् मन्त्री च जिनमन्दिरे ।
अष्टाह्निकोत्सवं चक्रे सङ्घं पूजयति स्म च ॥ ९४ ॥
दीनानाथादिसत्त्वेभ्यो ददौ दानं यथोचितम् ।
शान्तिमुद्घोषयामासाभयदानं च देहिनाम् ॥ ९५ ॥
सन्नद्धकवचैः पुम्भिर्विविधायुधधारिभिः ।
गृहं च रक्षयामास तथा हयगजादिभिः ॥ ९६ ॥
एवं क्रमेण संप्राप्तेऽकस्मात्पञ्चदशे दिने ।
राजान्तःपुरमध्ये वागुदस्थादीदृशी स्फुटा ॥ ९७ ॥
यथा हि मन्त्रिणः पुत्रः सुबुद्धिर्नाम दुर्मतिः ।
राजपुत्रयाः केशपाशं छित्त्वा क्वापि ययावहो ॥ ९८ ॥
तच्छ्रुत्वा कुपितो राजा दण्डौ कर्मेदृशं व्यधात् ।
अतिसन्मानितो मूर्खो मुमूर्षुः सचिवात्मजः ॥ ९९ ॥
अस्यापराधे वध्यो मे सकुटुम्बोऽपि मन्त्र्यसौ ।
इति च ज्ञापयामास पार्षद्यानखिलांस्ततः १०० ॥
सर्वोऽपि मारणीयोऽस्य मोच्या नो कर्मकर्यपि ।
इत्यादिश्य बलं मन्त्रिगृहे प्रैषीन्नराधिपः ॥ १ ॥
तदमात्यभटैरुद्धं गृहं चैत्यपुरः स तु ।
सुधीर्ध्यानमिषिष्टः सन् वृत्तान्तमशृणोदमुम् ॥ २ ॥

विनिवार्य निजान् पत्तीन् सेनामुख्यानदोऽवदत् ।
यथा नयत मां पार्श्वमेकवारं महीपतेः ॥ ३ ॥
तथा चक्रे च तैस्तस्याभवद्राजा पराङ्मुखः ।
तत्राप्यभिमुखीभूय स नत्वैवं व्यजिज्ञपत् ॥ ४ ॥
मया मुक्ताऽस्ति या राजन् ! मञ्जूषा सा निरूप्यताम् ।
गृहीत्वा तद्गतं वस्तु पश्चात् कुर्याद्यथोचितम् ॥ ५ ॥
राजा प्रोवाच द्रव्येण मां विलोभ्य समीहसे ।
अरे त्वमात्मनो मोक्षमपराधे महत्यपि ॥ ६ ॥
मन्त्र्याचे नाथ ! मे प्राणास्तवाऽऽयत्ताः सदैव हि ।
परं प्रसादो मञ्जूषाऽवलोके क्रियतां मम ॥ ७ ॥
ततस्तस्योपरोधेन लोकाभ्यर्थनया तथा ।
उद्घाटयामास सर्वान् मञ्जूषातालकान् नृपः ॥ ८ ॥
सवेणीकमव्यपाणिं सामिधेन्वितरं पुनः ।
मञ्जूषान्तः सुबुद्धिं तं वडवक्रममुदैक्षत ॥ ९ ॥
तं दृष्ट्वा विस्मयापन्नः पप्रच्छ सचिवं नृपः ।
किमेतदिति स प्रोचे नाहं जानामि किञ्चन ॥ १० ॥
जानात्येव भवान् राजन् ! यो हि भक्तोऽपि सर्वथा ।
व्यलीकं चिन्तयन् मूलच्छेदायोपस्थितो मम ॥ ११ ॥
परमार्थं ममाऽऽख्याहीत्युक्तो राज्ञाऽब्रवीत्पुनः ।
स्वामिन् ! केनापि रुष्टेन प्रचण्डव्यन्तरादिना ॥ १२ ॥
निर्दोषस्यापि पुत्रस्य दोष उत्पादितो मम ।
अन्यथैवं गोपितस्यावस्थाऽस्य कथमीदृशी ॥ १३ ॥

आपदेतन्निमित्तेनोपस्थिता मे सुदुःसहा ।
इति ज्ञात्वा यथायुक्तं विचारय कुरुष्व च ॥ १४ ॥
अभ्यधाच्च नृपो मन्त्रिन् ! तुष्टोऽस्मि तव सर्वथा ।
परं कथय विज्ञातं कथमेतत्त्वया स्फुटम् ॥ १५ ॥
ततो नैमित्तिकपृच्छाप्रभृत्याख्याय सोऽवदत् ।
सुलभा देव ! संसारे विपदो विषयाशिनाम् ॥ १६ ॥
देवमानुषतिर्यक्स्वकृता एताश्चतुर्विधाः ।
धर्मस्यैव प्रभावेन नश्यन्ति जगतीपते ! ॥ १७ ॥
राज्ये मन्त्रिपदे चैव निवेश्य स्वसनन्दनौ ।
तौ तेपाते तपोऽत्युग्रं प्रतिपद्यानगारताम् ॥ १८ ॥
तन्मित्र ! मन्त्रिणा तेन यथाऽऽपल्लङ्घितौजसा ।
आवामपि करिष्यावस्तथैव त्वं विषीद मा ॥ १९ ॥
मित्रानन्दोऽवदद् ब्रूहि कर्तव्यं हे वयस्य ! किम् ।
स ऊचेऽन्यत्र यास्यावो मुक्त्वा स्थानमदो निजम् ॥ २० ॥
तस्य चित्तपरीक्षार्थं पुनर्मित्रोऽब्रवीत् सखे ! ।
देशान्तरगतस्याङ्ग ! खेदस्तव भविष्यति ॥ २१ ॥
कालेन कियता तेन यच्छ्रवेन निवेदितम् ।
तज्ञावि सुकुमारत्वात् पञ्चत्वमधुनैव ते ॥ २२ ॥
अमरः स्माह गन्तव्यं दूरदेशान्तरेऽपि भोः ।
मया सौख्यमसौख्यं वा भोक्तव्यं च त्वया सह ॥ २३ ॥
ततश्च कृतसङ्केतौ गृहान्निःसृत्य तावुभौ ।
जग्मतुः क्रमयोगेन पाटलीपुरपत्तनम् ॥ २४ ॥

अशोकशोकपुन्नागनागपूगप्रियङ्गुभिः ।
नारङ्गादिकदल्याम्रचारुवृक्षैश्च शोभितम् ॥ २५ ॥
प्रासादमेकमुत्तुङ्गप्राकारपरिवेष्टितम् ।
तद्दृष्टिः पश्यतः स्मैतौ ध्वजराजिविराजितम् ॥२६॥(युग्मम्)
मुखाऽङ्गिकरणीयं तौ कृत्वा पुष्करिणीजले ।
अन्तः प्रविश्य प्रासादरूपलक्ष्मीमपश्यताम् ॥ २७ ॥
वर्णिकाऽप्सरसां विश्वकर्मणैव विनिर्मिता ।
दृष्टशेऽमरदत्तेन तत्र पाञ्चालिकैकका ॥ २८ ॥
पश्यन्नेतामथोत्पश्योऽमरः स्मरशरातुरः ।
विदाञ्चकार नो तृष्णां न क्षुधां न श्रमं च सः ॥ २९ ॥
मध्याह्नसमये जाते मित्रेणेति प्रजल्पितः ।
आर्येहि नगरं यावो येनोच्छूरं प्रवर्त्तते ॥ ३० ॥
स स्माह ननु भो भद्र ! क्षणं तावद्विलम्बय ।
यावत्पाञ्चालिकामेतामहं पश्याम्यशेषतः ॥ ३१ ॥
कौतूहलेन याऽऽरूढा तस्यास्तुङ्गे कुचस्थले ।
परिश्रान्तेव तद्दृष्टिः स्थिता तत्रैव सा चिरम् ॥ ३२ ॥
पुनस्तथैव मित्रेण क्षणेनोक्तो जजल्प सः ।
चलामि चेदितः स्थानात् ततो मृत्युर्भवेन्मम ॥ ३३ ॥
मित्रानन्दो जगादैवं कृत्याकृत्यविदः सदा ।
काऽस्यां पाषाणमय्यां ते हन्त रागातिरेकता ॥ ३४ ॥
यदि नारीरिरंसा ते ततः प्राप्तः पुरान्तरे ।

---

(१) ख ग -त्रैव ।

विधाय भोजनं स्वेच्छां पूरयेस्तामपि क्षणे ॥ ३५ ॥
एवमुक्तेऽपि तेनास्मिंस्तस्याः पार्श्वमसुञ्चति ।
भूरिमन्युभराक्रान्तो मित्रानन्दोऽरुदद्भृशम् ॥ ३६ ॥
रुरोदामरदत्तोऽपि स्थानं तत् तु मुमोच न ।
तावत्तत्रायया श्रेष्ठी प्रासादस्यास्य कारकः ॥ ३७ ॥
रत्नसाराभिधानेन तेनेदं भणितावियौ ।
भद्रौ युवां युवतिवत् किं नाम रुदिथो वृथा ॥ ३८ ॥
ततस्तुल्यस्य तस्याग्रे कथयित्वाऽऽदितः कथाम् ।
मित्रानन्देन मित्रस्य चेष्टितं तन्निवेदितम् ॥ ३९ ॥
तेनाथ बोधितोऽप्येष रागं पाञ्चालिकागतम् ।
न यावद्विजहौ तावत् स सखेदमचिन्तयत् ॥ ४० ॥
अप्यश्मनिर्मितं पुंसां यासां रूपं मनो हरेत् ।
वनिता विश्वमोहाय मन्ये ता वेधसा कृताः ॥ ४१ ॥
तावन्मौनी यतिर्ज्ञानी सुतपस्वी जितेन्द्रियः ।
यावन्न योषितां दृष्टिगोचरं याति पूरुषः ॥ ४२ ॥
एवं चिन्तापरः सोऽथ मित्रेण भणितं पुनः ।
तातास्मिन् सङ्कटे कार्ये क उपायो भविष्यति ॥ ४३ ॥
तस्मिंश्च कञ्चनोपायमपश्यति वणिग्वरे ।
मित्रानन्देन तमभिप्रोचे बुद्धिमता पुनः ॥ ४४ ॥
तं चेत् सूत्रकृतं [1]वेत्सि येनैषाऽकारि पुत्रिका ।
तदिच्छापूरणोपायमस्य तात ! करोम्यहम् ॥ ४५ ॥

---

(१) ख ग घ च ट वेद्मि।

रत्नसारोऽब्रवीत्तर्हि सूरदेवोऽत्र सूत्रकृत् ।
स तु कुङ्कुणदेशान्तःसोपारकपुरेऽस्ति भोः ॥ ४६ ॥
अहं निकेतनस्यास्य कारकस्तेन वेद्म्यदः ।
गंम त्वमपि मे तावदुपायं स्ववितर्कितम् ॥ ४७ ॥
सोऽवोचत्तात ! मन्मित्रमिदं प्रतिकरोषि चेत् ।
गत्वा सोपारके सूत्रधारं पृच्छाम्यहं ततः ॥ ४८ ॥
यद्यसौ पुत्रिका तेन स्यात्प्रतिकृतिना कृता ।
ततस्तस्मिन् समानीते सेत्स्यत्यस्य समीहितम् ॥ ४९ ॥
श्रेष्ठिना तत्प्रतीकारेऽङ्गीकृतेऽथामरोऽवदत् ।
योत्स्यामि यद्यपायं ते तदा यास्यन्ति मेऽसवः ॥ ५० ॥
इतरः स्माह नायामि हिमास्यन्तरहं यदि ।
तदा त्वयाऽवगन्तव्यं नास्ति मन्मित्रमित्यहो ॥ ५१ ॥
कष्टेन बोधयित्वैनं श्रेष्ठिनाऽनुमतोऽथ सः ।
अखण्डितप्रयाणोऽगात् सोपारकपुरे क्रमात् ॥ ५२ ॥
तत्राङ्गुलीयं विक्रीय गृहीत्वा वसनादि च ।
ताम्बूलव्यापृतकरः प्रययौ स्थपतेर्गृहे ॥ ५३ ॥
सत्थोक इति तेनास्य प्रतिपत्तिः कृता मुदा ।
शुभासनोपविष्टः स पृष्टश्चागमकारणम् ॥ ५४ ॥
भद्र ! देवकुलं रम्यं कारयिष्याम्यहं त्वया ।
परं प्रतिकृतिः काचिद्दृश्यतामिति सोऽब्रवीत् ॥ ५५ ॥
उवाच सूत्रकृच्चक्रे प्रासादो मयका किल ।
पुरे पाटलिपुत्राख्ये स दृष्टो भवता न किम् ॥ ५६ ॥

अवादीदपरो दृष्टः किं तु पञ्चालिकाऽमुका ।
प्रतिच्छन्दकृता तत्र स्वबुध्या रचिताऽथवा ॥ ५७ ॥
स जगादावन्तिपुर्यां महासेनस्य भूपतेः ।
सुताया रत्नमञ्जर्याः प्रतिच्छन्देन सा कृता ॥ ५८ ॥
पृष्ट्वा सुदिनमेष्यामीत्युक्त्वा गत्वा पणेऽथ सः ।
विक्रीय चारुवस्त्राणि व्यधात्पाथेयसूत्रणाम् ॥ ५९ ॥
ततोऽखण्डप्रयाणैः स गच्छन्नुज्जयिनीं ययौ ।
तत्र गोपुरमध्यस्थो देव्या देवकुलेऽवसत् ॥ ६० ॥
अत्रान्तरे स शुश्राव पटहोद्घोषणामिमाम् ।
यामिन्याश्चतुरो यामान् यो रक्षेन्मृतकं ह्रदः ॥ ६१ ॥
तस्मै ददाति दीनारसहस्रं वणिगीश्वरः ।
मित्रानन्देन श्रुत्वेवं पृष्टो दौवारिकस्तदा ॥ ६२ ॥ (युग्मम्)
दीयतेऽतिप्रभूतं स्वं भोः कार्ये किमियत्यपि ।
स आचख्यावियं मारीविद्रुताऽस्त्यधुना पुरी ॥ ६३ ॥
अयं मारीकृतो यावच्छवः श्रेष्ठिगृहेऽभवत् ।
तावदस्तमितः सूर्यः प्रतोली पिहिता ह्यसौ ॥ ६४ ॥
समर्थो रक्षितुं कोऽपि न मारीहतमित्यसुम् ।
ततोऽस्य रक्षणे भद्र ! लभ्यते प्रचुरं धनम् ॥ ६५ ॥
कार्याणि धनहीनानां न सिध्यन्ति महीतले ।
इति मित्रः स्वलाभार्थं शवरक्षां प्रपन्नवान् ॥ ६६ ॥
तस्येप्सितं धनस्यार्धमर्पयित्वा शवं च तम् ।
शेषं प्रभाते दास्यामीत्युक्त्वाऽगादीश्वरो गृहे ॥ ६७ ॥

गाकिनीभूतवेतालोपसर्गेषु भवत्स्वपि ।
रक्षितं तेन तद्रात्रौ मृतकं धीरताजुषा ॥ ६८ ॥
प्रभातं स्वजनैस्तच्च मृतकं भस्मसात्कृतम् ।
धनं मार्गयतो मित्रानन्दस्य दरिद्रं न तं ॥ ६९ ॥
सोऽवदद्यदि राजाऽत्र महासेनो भविष्यति ।
ततो लप्से धनमहमित्युक्ताऽगमदापणे ॥ ७० ॥
गृहीत्वा चारुवस्त्राणि दीनारैकशतेन सः ।
विधाय चोद्भटं वेषं वेश्यायाः सदनं ययौ ॥ ७१ ॥
वसन्ततिलकानाम्ना रूपयौवनयुक्तया ।
अभ्युत्थानादिसत्कारो विदधे तस्य वेश्यया ॥ ७२ ॥
दत्तानि तेन चत्वारि दीनाराणां शतान्यथ ।
कुट्टिन्या हर्षिता सा चादिदेशेति सुतां निजाम् ॥ ७३ ॥
द्रष्टव्यो गौरवेणैष पुत्रुदारो नरस्त्वया ।
आदावेव धनं येन समादायि प्रभूतशः ॥ ७४ ॥
ततः सा स्वयमेवास्य चक्रे स्नानादिसक्रियाम् ।
प्रदोषसमये वासगृहे तस्या ययावसौ ॥ ७५ ॥
धरायातामरीकल्पा कल्पिताऽनल्पभूषणा ।
तत्र शय्यागतं तस्मिन् गणिका सा समाययौ ॥ ७६ ॥
सोऽथ दध्यौ न विषयासक्तानामिह देहिनाम् ।
नूनं कार्याणि सिध्यन्तीति विचिन्त्याब्रवीच्च ताम् ॥ ७७ ॥
करोमि स्मरणं काञ्चिद् भद्रे ! पट्टं समानय ।
इत्युक्ते सहसाऽऽनीतः पट्टो हेममयस्तया ॥ ७८ ॥

तत्रोपविश्य निविडं कृत्वा पद्मासनं तथा ।
वस्त्रेणाच्छादयित्वाऽङ्गं सोऽस्थाद्दृढिमतां वरः ॥ ७९ ॥
गतेऽथ प्रथमे यामे रन्तुमभ्यर्थितस्तया ।
स तु मौनपरस्तस्थौ हृया ध्यानेन शान्तवत् ॥ ८० ॥
एवं ध्यानपरस्यास्य सकलाऽपि गता निशा ।
प्रभाते स समुत्थाय देहचिन्ताकृते ययौ ॥ ८१ ॥
सङ्गावेऽथ तयाऽऽख्याते पुनः सा भणिताऽक्रया ।
सर्वथा सेवनीयोऽयं हे पुत्रि ! त्वयका नरः ॥ ८२ ॥
अस्मिंश्च कामिते वित्तं स्थिरमेतद्भविष्यति ।
अन्यथा भद्रिते शीर्षे तत्प्रसूनमिवास्थिरम् ॥ ८३ ॥
द्वितीयाऽपि निशा तस्यातिक्रान्तैवं तथाऽपरा ।
ततस्तं कुट्टिनी रुष्टा सोपालम्भमदोऽवदत् ॥ ८४ ॥
भद्रेमां मम पुत्रीं त्वं भूपानामतिदुर्लभाम् ।
विडम्बयसि किं नामानुरक्तामप्यकामयन् ॥ ८५ ॥
सोऽवदत्समये सर्वं करिष्याम्यक्क ! साध्वहम् ।
किं तु पृच्छामि राज्ञस्ते प्रवेशोऽस्ति गृहे नवा ॥ ८६ ॥
सोवाच वत्स ! मे पुत्री राज्ञश्चमरधर्यसौ ।
तेन तस्य गृहे रात्रौ दिवा चाहमवारिता ॥ ८७ ॥
यद्येवं तस्य तनयामक्क ! त्वं रत्नमञ्जरीम् ।
जानासीत्युदिता तेन सोचे सा मत्सुतासखी ॥ ८८ ॥

---

(१) दृ -धा- ।

मित्रानन्दोऽवदत्तर्हि तदये कथय त्वकम् ।
भद्रे ! गुणोत्करः पद्यमानो यस्य श्रुतस्त्वया ॥ ८८ ॥
जातानुरागया लेखो यस्य च प्रेषितो मुदा ।
तस्येहामरदत्तस्याऽऽगतोऽस्मि सुहृदित्यलम् ॥८०॥(युग्मम्)
प्रतिश्रुत्याथ तत्कार्यं सा तस्या अन्तिकं ययौ ।
तया च हृष्टवदना दृष्टा पृष्टैवमब्रवीत् ॥ ८१ ॥
अहं हि त्वत्प्रियोदन्तमद्य तुभ्यं निवेदितुम् ।
आगताऽस्मि ततः स्मेरवदना नृपनन्दिनी ॥ ८२ ॥
कोऽसौ मम प्रिय इति तयोक्ते सा न्यवेदयत् ।
वृत्तान्तमखिलं तस्य मित्रानन्दमुखाच्छ्रुतम् ॥ ८३ ॥
तच्छ्रुत्वा राजपुत्र्येवं दध्यौ धूर्त्तविजृम्भितम् ।
सर्वमेतद् यतः कोऽपि वल्लभोऽद्यापि नास्ति मे ॥ ८४ ॥
परं येनेदृशी कूटरचना विहिता विधा ।
पश्यामि तमहं दृष्ट्येत्यालोच्याक्का तयोदिता ॥ ८५ ॥
गवाक्षेणामुना सोऽद्याऽऽनेतव्यः पुरुषस्त्वया ।
मम प्रियस्य सन्देशवाचको लेखसंयुतः ॥ ८६ ॥
आगत्य निजगेहे सा कुट्टिनी हर्षपूरिता ।
तदुक्तं कथयामास मित्रानन्दस्य धीमतः ॥ ८७ ॥
निनाय च निशायां तं द्वारे राजगृहस्य सा ।
प्राकारमप्रदुर्लङ्घ्यमिदं तस्मै शशंस च ॥ ८८ ॥
कन्यावासगृहं पृष्ट्वा मित्रोऽथ विससर्ज ताम् ।
विद्युदुत्क्षिप्तकिरणेनाविशच्च नृपालये ॥ ८९ ॥

प्राकारोल्लङ्घनं तं च कुर्वन्तं वीक्ष्य कुट्टिनी ।
महावीरोऽयमित्यन्तर्निवृत्ता स्वगृहं ययौ ॥ २०० ॥
मित्रानन्दोऽप्यथाऽऽरूढो राजपुत्र्या निकेतनम् ।
सुष्वाप साऽपि तद्वीरचर्यामालोक्य कैतवात् ॥ १ ॥
कटकं राजनामाङ्कं स तद्धस्तादुपाददे ।
चक्रे क्षुरिकया वीरो दक्षिणोरौ च लक्षणम् ॥ २ ॥
तेनैव विधिना सोऽथ निर्गत्य नृपमन्दिरात् ।
सुप्तो देवकुले क्वापि दध्यौ चैवं नृपात्मजा ॥ ३ ॥
न सामान्यः पुमानेष चरित्रेणानुना ध्रुवम् ।
तन्मया न कृतं साधु नायं सम्भाषितो यतः ॥ ४ ॥
अनया चिन्तया रात्रिं गमयित्वा निशात्यये ।
निद्रामवाप सा बाला स तु वीरनरस्तदा ॥ ५ ॥
उत्थाय द्वारदेशे च गत्वा भूपतिवेश्मनः ।
अहो अन्याय इत्युच्चैः पूत्करोति स्म बुद्धिमान् ॥ ६ ॥
राजादिष्टप्रतीहाराकारितो नृपसन्निधौ ।
गत्वा नत्वा नृपं मित्रानन्दोऽथैवं व्यजिज्ञपत् ॥ ७ ॥
प्रचण्डशासने देव ! त्वयि सत्यपि भूपतौ ।
वणिजा परिभूतोऽहमीश्वरेण विदेशगः ॥ ८ ॥
राज्ञा च [1]कथमित्युक्तं कथयामास तस्य सः ।
द्रव्यलाभावसानां तां शबरक्षणजां कथाम् ॥ ९ ॥

---

(१) ख घ च ज किमितीत्युक्तः । ग ङ ट ढ कथमित्युक्तः ।

ततश्चाज्ञापितो राज्ञा रक्षकस्त्वयकाऽऽशु रे ! ।
सोऽत्र बध्वा दुराचारो वणिगानीयतामिति ॥ १० ॥
ज्ञातव्यतिकरः सोऽथ स्वयमेत्य नृपान्तिकम् ।
दीनारानार्पयत्तस्य नृपस्यैवं शशंस च ॥ ११ ॥
तस्मिन् काले मया देव ! शोकाकुलितचेतसा ।
शवकृत्यविहस्तेन दत्तमस्य धनं न हि ॥ १२ ॥
लोकाचारेण दिवसत्रितयं विगतं यतः ।
द्रव्यदानविलम्बेन दोषः को नाम मे प्रभो ! ॥ १३ ॥
निर्दोष इति भूपालो वणिजं विससर्ज तम् ।
मित्रानन्दं च पप्रच्छ शवरक्षणजां कथाम् ॥ १४ ॥
सोऽवदद्देव ! यद्यस्ति भवतोऽत्र कुतूहलम् ।
तदेकमानसो भूत्वा शृणु त्वं कथयाम्यहम् ॥ १५ ॥
नन्वहं धनलोभेनाङ्गीकृत्य शवरक्षणम् ।
यावदस्थामप्रमत्तो गृहीत्वा क्षुरिकां करे ॥ १६ ॥
गतेऽथ प्रथमे यामे रात्रेराविरभूत्तदा ।
स्फोटयन्निव ब्रह्माण्डं प्रचण्डः फेरवीरवः ॥ १७ ॥
ज्वलद्दावानलज्वालाजालपिङ्गलरोमकाः ।
क्षणाच्च परितः स्वस्य शृगालीर्दृष्टवानहम् ॥ १८ ॥
क्लीबजीवितनाशाभिस्ताभिरत्तुभिते मयि ।
द्वितीये प्रहरे रात्रेः प्रादुरासन्निशाचराः ॥ १९ ॥

---

(१) द ततः ।

अतीव भीषणाः कृष्णवर्णाः किलकिलोर्जिताः ।
मम सत्त्वसमीरेण ते प्रणष्टा घना इव ॥ २० ॥
क्व गमिष्यसि रे दासेति वदत्यः सकर्तिकाः ।
एत्य नष्टाश्च शाकिन्यस्तृतीयप्रहरे निशः ॥ २१ ॥
चतुर्थप्रहरे राजन् ! अप्सरस्सदृशाकृतिः ।
दिव्यांशुकाच्छादिताङ्गी नानाभरणभूषिता ॥ २२ ॥
मुक्तकेशा करालास्या ज्वालाभिः कर्त्तिकाकरा ।
मम पार्श्वेऽबला काचिदाययौ भयकारिणी ॥२३॥ (युग्मम्)
क्षयं नेष्यामि दुष्टाऽद्य भवन्तमिति वादिनीम् ।
तां विलोक्य मया राजन् ! सेयं मारीति चिन्तितम् ॥२४॥
ततोऽतिसविधीभूता धृता वामकरे क्षणात् ।
मया वामकरेणैषोत्पाटिताऽन्येन शस्त्रिका ॥ २५ ॥
मोटयित्वा मम करं बलादेव ! चचाल सा ।
मया क्षुरिकया यान्ती दक्षिणोरौ च लक्षिता ॥ २६ ॥
तस्थौ च कटकं तस्या ममैव हि करे प्रभो ! ।
अत्रान्तरेऽजिनोबन्धुरुदियाय दिवाकरः ॥ २७ ॥
तच्छ्रुत्वा विस्मितो राजा प्रोचे दर्शय तत्कटम् ।
मारीहस्ताद् गृहीतं यत् त्वया वीरशिरोमणे ! ॥ २८ ॥
परिधानांशुकग्रन्थिमध्यादाकृष्य तद् द्रुतम् ।
मित्रानन्दोऽर्पयामास कटकं भूपतेः करे ॥ २९ ॥

---

(१) ख ज त -वो- ।
(२) ख ट त बलादेव ।

स्वनामाङ्कं च तद्दृष्ट्वा स दध्यौ किमहो मम ।
कन्यकैवाभवन्नारी यत्तस्या भूषणं ह्यदः ॥ ३० ॥
देहचिन्ताऽपदेशेन ततश्चोत्थाय भूपतिः ।
गत्वा च कन्यकापार्श्वं प्रसुप्तां[1] तामलोकयत् ॥ ३१ ॥
दृष्ट्वा वामकरं तस्या गतालङ्करणं तथा ।
पट्टबन्धं व्रणस्थाने वज्राहत इवाभवत् ॥ ३२ ॥
अचिन्तयच्च वंशो मे चन्द्रमण्डलनिर्मलः ।
कलङ्कितोऽनया दुष्टकन्यया सर्वथा यतः ॥ ३३ ॥
नृशंसोऽसूनृताभाषी कुशीलश्चञ्चलाशयः ।
स्त्रीजनो जायते यत्र तत्कुलं न हि निर्मलम् ॥ ३४ ॥
न यावन्नगरीलोकं निखिलं मारयत्यसौ ।
तावत् केनाप्युपायेन कार्योऽस्या एव निग्रहः ॥ ३५ ॥
विचिन्त्यैवं वलित्वा चापृच्छन्मित्रं महीपतिः ।
भद्र ! किं साहसेनैव सृतकं रक्षितं त्वया ॥ ३६ ॥
अथवा मन्त्वगक्तिस्ते काचिदस्तीति सोऽवदत् ।
कुलक्रमागतो नाम मम मन्त्रोऽपि विद्यते ॥ ३७ ॥
कृत्वैकान्तमथाचख्यौ राजा यद् भद्र ! मे सुता ।
मारी, नास्यत्र सन्देहस्ततोऽस्या निग्रहं कुरु ॥ ३८ ॥
मित्रानन्दोऽवदद्वाक्यं घटते देव ! नेदृशम् ।
यत्कुमारी भवेन्नारी समुत्पन्ना कुले तव ॥ ३९ ॥

---

(१) ख घ ज झ -ग्रामवलोकयत् ।

उवाच भूपतिर्नाऽ[1]माघटमानं किमत्र भोः ! ।
मेघवृन्दोऽवा विद्युद् भवेत् प्राणहरी न किम् ? ॥ ४० ॥
इतरः स्माह यद्येवं तदियं दर्श्यतां मम ।
यतः साध्यामसाध्यां वा वेद्मि दृष्ट्वा[2] विलोक्य ताम् ॥ ४१ ॥
गत्वा[3] विलोकयेत्युक्तो राज्ञा तत्र जगाम सः ।
सुप्तोत्थिता कुमारी सा तमायान्तमलोकयत् ॥ ४२ ॥
दध्यौ चैवं नरः सोऽयं येन मे कटकं हृतम् ।
मन्ये त्वाऽऽज्ञापितो राज्ञा यन्निःशङ्कः[4] समेत्य[5]लम् ॥ ४३ ॥
तया दत्तासने सोऽथोपविश्यैवमवोचत ।
मया ह्यारोपितं सुभ्रु ! कलङ्कं [6]सुमहत् तव ॥ ४४ ॥
अर्पयिष्यति भूपालो मम त्वामद्य सुन्दरि ! ।
ततः स्थानं नयामि त्वं तव चेत् सम्मतं भवेत् ॥ ४५ ॥
नो चेदियत्यपि गते ऽकलङ्कां त्वां करोम्यहम् ।
त्वया जलाञ्जलिर्भद्रे ! मम देयस्तदा पुनः ॥ ४६ ॥
तच्छ्रुत्वाऽचिन्तयदसौ कन्या तद्गुणरञ्जिता ।
अहो अकृत्रिमप्रेमा कोऽप्यसौ पुरुषो मयि ॥ ४७ ॥

---

(१) ख घ ज झ -म घटते न किमत्र भोः ।
(२) ङ ञ ट -दृष्ट्वाऽव- ।
(३) ङ ञ ट -त्वाऽव- ।
(४) ट -शङ्कं ।
(५) ङ -त्यसौ ।
(६) ज ञ ट ट सुमहत्तरम् ।

दुःखमप्युररीकृत्य त्वयणीयस्ततो मया ।
सुलभो राज्यलाभोऽपि न तु स्नेहपरो जनः ॥ ४८ ॥
ऊचे च सुभग ! प्राणास्तवाऽऽयत्ता इमे मम ।
त्वया [1]महागमिष्यामि वेत्ति किं न भवानिदम् ॥ ४९ ॥
अन्यो नरपतेश्चित्तं व्याख्यानं महिला जलम् ।
तत्रैतानि हि गच्छन्ति नीयन्ते यत्र गिञ्चितैः ॥ ५० ॥
ज्ञात्वा मनोरथान् सिद्धानिति मित्रो जगाद ताम् ।
फेल्काराः मर्षपन्नेपि त्वया मोच्या नृपान्तिके ॥ ५१ ॥
उपेत्य च नृपं प्रोचे मा मारी मम मङ्गहे ।
प्राप्ता ढौकय किं त्वेकं भूपते ! शीघ्रवाहनम् ॥ ५२ ॥
तत्राऽधिरोप्य यामिन्यां त्वदेशान्तं नयाम्य[2]हम् ।
उदेष्यत्यन्तरा सूर्यश्चेन्मारी सा तथा स्थिता ॥ ५३ ॥
ततो भीतेन राज्ञाऽस्य ढौकिता वडवा निजा ।
वायुवेगवती प्राणप्रिया लोकहितैषिणा ॥ ५४ ॥
मन्त्र्याकाले च केशेषु गृहीत्वा मा समर्पिता ।
तस्य तेनापि फेल्कारान् मुञ्चतो हक्किताऽसकृत् ॥ ५५ ॥
ततस्तां वडवारूढां पुरस्कृत्य चचाल सः ।
राजाऽपि गोपुरं यावत् तावन्वित्य गृहं ययौ ॥ ५६ ॥
मित्रानन्दमवादीत्साऽर्वत्यां त्वमपि सुन्दर ! ।
अस्यामारुह किं पादचारेण मति वाहने ॥ ५७ ॥

---

(१) ट मह गमिष्यामि ।
(२) ङ ञ ण ट -म्यमूम् ।

क्षणमेकमहं पङ्गां यास्यामीति वदन्नसौ ।
तदर्थमर्थितो भूयः सोमां प्राप्तस्तया भृशम् ॥ ५८ ॥
मित्रः प्रोवाच हे सुभ्रु ! नात्मार्थं मयका त्वकम् ।
आनीता किं तु मित्रस्यामरदत्तस्य हेतवे ॥ ५९ ॥
मित्रव्यतिकरं चास्याः कथयित्वा न्यवेदयत् ।
न मे युक्तं त्वया सार्द्धमेकत्र शयनासनम् ॥ ६० ॥
तच्छ्रुत्वा राजपुत्री सा दध्यौ विस्मितमानसा ।
अहो अस्य महापुंसश्चरित्रं भुवनोत्तरम् ॥ ६१ ॥
पिता माता सखा भ्राता यदर्थं वञ्च्यते नरैः ।
प्राप्ताऽपि कामिनी साऽहं येन नो कामिता सता ॥ ६२ ॥
सर्वोऽपि सहते क्लेशं स्वार्थसिद्धिपरायणः ।
परार्थसाधने कोऽपि विरलोऽङ्गीकरोति तम् ॥ ६३ ॥
चेतसा चिन्तयत्येवं[1] स्त्रीरत्नं रत्नमञ्जरी ।
पार्श्वे पाटलिपुत्रस्य निन्ये मित्रेण सा शनैः ॥ ६४ ॥
इतश्चामरदत्तोऽसौ [2]पूर्णे मासद्वयावधौ ।
अनागच्छति मित्रे च रत्नसारमदोऽवदत् ॥ ६५ ॥
तात ! मे नायको मित्रं काष्ठैः कारय तच्चिताम् ।
येन तद्दुःखदग्धोऽहं प्रवेक्ष्यामि हुताशने ॥ ६६ ॥
तच्छ्रुत्वाऽधिकदुःखार्त्तः स श्रेष्ठी पौरसंयुतः ।
क्रन्दन्नत्याग्रहेणास्य रचयामास तां चिताम् ॥ ६७ ॥

---

(१) ङ ण द -चिन्तयत्ये-।
(२) ञ ण द पूर्णमासद्वयावधिः ।

[1]वङ्को पार्श्वस्थितैः सर्वैर्नागरैर्भणितोऽथ सः ।
भद्राद्यापि प्रतीक्षस्व येनेदमवधेर्दिनम् ॥ ६८ ॥
एवमस्त्विति तस्मिन्निपिङ्गमरणे जनैः ।
अपराह्णे तया सार्द्धं मित्रस्तत्र समाययौ ॥ ६९ ॥
आगच्छन्तं तमुद्दीक्ष्यामरदत्तः समभ्रमः ।
उत्थायाऽऽलिङ्गति स्माशुजलधौतमुखाम्बुजः ॥ ७० ॥
यत्तयोर्मित्रयोः सौख्यमभून्मिलितयोः किल ।
तावेव वेदकौ तस्य नान्यस्तद्वक्तुमीश्वरः ॥ ७१ ॥
मित्रानन्दोऽवदन्मित्र ! तव चित्तस्य चौर्यसौ ।
आनीताऽस्त्युररीकृत्य मया कष्टपरम्पराम् ॥ ७२ ॥
इतरः स्माह बन्धो ! त्वं सत्यनामा सदैव मे ।
साधितेनामुनाऽर्थेन विग्रहेणाभवः पुनः ॥ ७३ ॥
[2]अपनाय्य चितैधांसि स्थाने तद्वाग्निसाक्षिकम् ।
मित्रः कारयति स्माथ पाणिग्रहणमेतयोः ॥ ७४ ॥
विलोक्य रत्नमञ्जर्या रूपं पौरगणोऽवदत् ।
तन्नाश्चर्यं यदेषोऽस्याः प्रतिच्छन्देन मोहितः ॥ ७५ ॥
वृत्तोद्वाहस्य तस्याथाऽमरदत्तस्य तत्र यत् ।
सञ्जातं भाग्ययुक्तस्य तदितः शृयतां जनाः ! ॥ ७६ ॥
तस्मिन्नेव पुरेऽपुत्रो महीपालो व्यपद्यत ।
चक्रे च राजलोकेन पञ्चदिव्याऽधिवासना ॥ ७७ ॥

---

(१) ण त वङ्किपार्श्वस्थितैः । ञ ट वङ्को पार्श्वस्थिते ।
(२) ञ अपनीय ।

भ्रान्त्वा त्रिकचतुष्कादिस्थानेषु निखिले पुरे ।
तानि तत्र समाजग्मुः कुमारो यत्र विद्यते ॥ ७८ ॥
हर्षेन हेषितं द्राक् हस्तिना गुलगुलायितम् ।
चक्रे तस्योपरि च्छत्रं तस्थौ तत्र स्वयं तथा ॥ ७९ ॥
वीजितं चामराभ्यां च भृङ्गारेण विनिर्ममे ।
महीपत्वा[1]भिषेकोऽस्य, पुण्यैः किं नाम नो भवेत् ॥ ८० ॥
ततस्तं शुण्डयोत्पाद्य गजः स्कन्धेऽध्यरोहयत् ।
विवेश नगरे सोऽथ सञ्जातानेकमङ्गलः ॥ ८१ ॥
पुरप्रवेशे तस्याथ मिलितो महिलाजनः ।
राजराज्ञोः स्वरूपं तं दृष्ट्वाऽन्योऽन्यमदोऽवदत् ॥ ८२ ॥
काचिज्जजल्प राज्ञोऽस्य रूपसम्पद[2]मुत्तमाम् ।
पश्य विश्वजनश्लाघ्यां हला ! रतिपतेरिव ॥ ८३ ॥
अन्याऽवादीत् किमन्यत्त्वं मुग्धे ! वर्णयसि स्फुटम् ।
देव्याः समानरूपाऽस्या न स्त्री त्रिभुवनेऽपि यत् ॥ ८४ ॥
अपरा स्माह यद्रूपमस्यास्त्रिभुवनोत्तरम् ।
तदेतत्प्रतिच्छन्देन मोहितोऽयमभून्नृपः ॥ ८५ ॥
इतरोचे हला ! पुण्यभागिन्येषा महीतले ।
यया विश्वजनश्रेष्ठो लब्ध एवंविधो धवः ॥ ८६ ॥
[3]प्रत्युक्तमन्ययोषाभिर्धन्यो येनेदृशी प्रिया ।
लब्धा विदेशगेनापि लक्ष्मीरिव मुरद्विषा ॥ ८७ ॥

---

(१) ज महीपट्टाभि- । ख ण महीपत्य- ।
(२) ण रूपसंपद उत्तमाः । (३) ण ट प्रत्युक्तमन्ययैषोऽपि ।

कृत्वा गाढोद्यमं येनानीतेयं मृगलोचना ।
तदस्य भाग्यवन् मित्रं श्लाघ्यमित्यपराऽवदत् ॥ ८८ ॥
जजल्पान्या किमेतं न श्रेष्ठिनं वर्णयस्यलम् ।
अविज्ञातोऽपि येनायं पुत्रवत् परिपालितः ॥ ८९ ॥
इत्यालापान् पुरस्त्रीणां शृण्वानः प्रीतमानसः ।
ययावमरदत्तोऽसौ द्वारे नृपतिवेश्मनः ॥ ९० ॥
स्तम्बेरमात्समुत्तीर्य्य विवेशाऽऽस्थानमण्डपे ।
उपाविशच्च तत्रैव नृपमण्डलसेवितः ॥ ९१ ॥
सा रत्नमञ्जरी देवी मित्रानन्दः सुहृत्तया ।
निषेदतुर्नृपोपान्ते यथास्थानमथापरे ॥ ९२ ॥
चक्रे राज्याभिषेकोऽस्य सामन्तैर्मन्त्रिभिस्तथा ।
राज्ञा च विहिता पट्टराज्ञी सा रत्नमञ्जरी ॥ ९३ ॥
चक्रे सर्वाऽधिकारी च मित्रानन्दो [1]महामतिः ।
स्थापितश्च पितुः स्थाने रत्नसारो वणिग्वरः ॥ ९४ ॥
एवं कृत्वोचितं तेषां कृतज्ञैकशिरोमणिः ।
अखण्डशासनो राज्यं पालयामास तत्र सः ॥ ९५ ॥
राज्यकार्यरतोऽप्येवं मित्रानन्दः शुकोदितम् ।
तन्मृत्युसूचकं वाक्यं विसस्मार कदापि न ॥ ९६ ॥
एकदा तेन भूपस्य कारणं तन्निवेदितम् ।
देशान्तरगतिः स्वस्य प्रार्थिता च पुनस्तत. ॥ ९७ ॥

---

(१) द न्तमेण सः ।

प्रत्युक्तो भूभुजा सोऽपि मा कार्षीस्त्वं भयं सखे ! ।
दुष्टोऽपि स्थितयोरत्र कर्ता नौ व्यन्तरः स किम् ? ॥ ९८ ॥
मित्रानन्दोऽवदत् प्रत्यासन्नत्वेन मनो मम ।
अद्यापि दूयते दूरं तन्मां प्रेषय भूपते ! ॥ ९९ ॥
विचिन्त्योक्तं पुना राज्ञा यद्येवं गच्छ तत् सखे ! ।
नरैः प्रत्ययितैः सार्द्धं वसन्तपुरपत्तनम् ॥ ३०० ॥
अङ्गीकृते तदादेशे विसृष्टोऽसौ महीभुजा ।
प्रेषिताश्च समं तेन शिक्षां दत्त्वेति पूरुषाः ॥ १ ॥
हंहो ! तत्र गतैः कैश्चिद् युष्माभ्यान् ममान्तिकम् ।
आगन्तव्यमिहैतस्य क्षेमवार्तां निवेदितुम् ॥ २ ॥
अथ मित्रे गते राजा तद्वियोगार्दितोऽपि सः ।
पुण्यलभ्यां समं देव्या भुङ्क्ते स्म नृपतिश्रियम् ॥ ३ ॥
तेषां मध्यान्नृणां कोऽपि नाऽऽययौ भूभुजा ततः ।
अन्ये संप्रेषितास्तस्य शुद्धिज्ञानकृते नराः ॥ ४ ॥
प्रत्यागतैश्च तैः पुंभिः कथितं नृपतेरदः ।
दृष्टोऽसौ तत्र नाऽस्माभिः वार्ताऽप्यस्य श्रुता न हि ॥ ५ ॥
ततः संभ्रान्तचित्तो राट् देवीमूचे कथं प्रिये ! ।
कर्तव्यं यन्न वार्ताऽपि श्रुता मित्रस्य हा ! मया ॥ ६ ॥
साऽऽख्यद् यद्येति कोऽप्यत्र ज्ञानी तत्तेन क्षिप्यते ।
सन्देहोऽयं प्राणनाथ ! हन्त नान्येन केनचित् ॥ ७ ॥
उद्यानपालकेनेति विज्ञप्तोऽवान्तरे नृपः ।
देवाऽऽयातोऽस्ति श्रीधर्मघोषसूरिः पुरे तव ॥ ८ ॥

अशोकतिलकोद्याने प्राशुकस्थण्डिले स्थितः ।
चतुर्ज्ञानधरो धर्मं लोकानामादिशत्यसौ ॥ ९ ॥
समयाऽऽगमनं तस्य श्रुत्वाऽसौ भक्तितत्परः ।
ययौ तद्वन्दनाहेतोः सामग्र्या प्रेयसीयुतः ॥ १० ॥
खड्गादिराजचिह्नानि मुक्त्वा गुर्वन्तिकं गतः ।
नत्वा सपरिवारं तं निषसाद यथास्थिति ॥ ११ ॥
गुरुरूचेऽत्र भोः ! स्वर्गापवर्गादिसुखैषिभिः ।
नष्टदुष्टाष्टकर्माऽयं कर्तव्यो धर्म एव हि ॥ १२ ॥
अवान्तरेऽशोकदत्तः पप्रच्छैवं वणिग्वरः ।
भगवन् ! कर्मणा केनाशोकश्रीर्दुहिता मम ॥ १३ ॥
अतीववेदनाऽऽक्रान्ता सर्वाङ्गेष्वभवत्ततः ।
चिकित्साश्च कृतास्तस्या रोगशान्तिर्बभूव न ॥१४॥(युग्मम्)
सूरिः प्रोचे भूतशालनगरे श्रेष्ठिनः प्रिया ।
साऽभवद् भूतदेवस्य नाम्ना कुरुमती पुरा ॥ १५ ॥
पीते मद्येऽन्यदा दुग्धे मार्जार्या, भणिता तया ।
स्नुषा देवमती नाम्नी गाढकोपवशादिदम् ॥ १६ ॥
शाकिन्या किं गृहीताऽसीर्यन्नारक्षि पयस्त्वया ।
साऽपि तद्वचसा भीतोत्कम्पिताङ्गी बभूव च ॥ १७ ॥
ततः सा दुष्टमातङ्गया शाकिनीमन्त्रयुक्तया ।
भक्षिता [1]स्वकर्मकार्यैव च्छलं लब्ध्वा झटित्यपि ॥ १८ ॥

---

(१) ङ ज ट ण स्वकर्मकार्यैव ।

ततस्तद्वेदनाक्रान्ता भिषग्भिः सा चिकित्सिता ।
दोषे तथाऽप्यशान्तेऽस्या योगी कोऽपि समाययौ ॥ १९ ॥
मन्त्रवादेऽमुनाऽऽरब्धेऽग्निना यन्त्रे च ताडिते[1] ।
मातङ्गी मुक्तकेशा सा तत्रागाद्वेदनार्दिता ॥ २० ॥
[2]क्व गृहीता त्वयाऽसाविति पृष्टा योगिना पुनः ।
श्वश्रूदुर्वाक्यभीताङ्गी मयाऽऽत्तेति जगाद सा ॥ २१ ॥
[3]नीरोगाऽथ क्षुधा साऽभूच्छाकिनी सा विनाशिका ।
[4]योगिनो वचसा तस्य राज्ञा निर्वासिता पुरात् ॥ २२ ॥
कुरुमत्यपि लोकेन कालजिह्वेति जल्पिता ।
ततः सा संयतीपार्श्वे व्रतं जग्राह भावतः ॥ २३ ॥
विशुद्धं पालयित्वा तन्मृत्वाऽगादमरालयम् ।
ततश्युतेयं संजाता श्रेष्ठिनस्ते दुहिता सका ॥ २४ ॥
उक्ता नालोचितं पूर्वभवे दुर्वाक्यमेतया ।
यतस्तेनेयमाकाशदेवतादोषदूषिता ॥ २५ ॥

---

(१) श्रीमाणिक्यचन्द्रसूरिनिर्मिते शान्तिनाथचरित्रे तृतीयसर्गे—
विदित्वा शाकिनीदोषं मान्त्रिको यन्त्रमालिखत् ॥ २७६ ॥
कृत्वा समग्रां सामग्रीं यावत्तत्ताप्यतेऽग्निना ।

(२) ज किं ।

(३) ञ द प्रभावाद् योगिनस्तस्य शाकिन्या सा क्षुधोज्झिता ।

(४) द सापि तद्वचसा शीघ्रं राज्ञा निर्वासिता पुरात् ।
ञ सापि तद्वचसा राज्ञा मुक्ता कृतविलक्षणा ।

तामिहानय कन्यां त्वं श्रुत्वा येन वचो मम ।
असौ पूर्वभवं जातिस्मरणेन हि पश्यति ॥ २६ ॥
तस्मादुपद्रवादाशु मुच्यते सेति सूरिणा ।
कथिते श्रेष्ठिना निन्ये सा सद्यस्तत्पदान्तिकम् ॥ २७ ॥
नष्टाः सूरिप्रभावेण खगामिन्यः क्षणेन ताः ।
श्रुत्वा च चरितं स्वस्य जातिस्मृतिमवाप सा ॥ २८ ॥
जजल्प च प्रभो ! सत्यं यद् युष्माभिर्निवेदितम् ।
तदलं भववासेन परिव्रज्यां प्रयच्छ मे ॥ २९ ॥
गुरुः प्रोवाच ते भोगफलं कर्मास्ति संप्रति ।
भुक्ते तस्मिन् श्रमणी त्वं भविष्यसि शुभाशये ! ॥ ३० ॥
एवमस्त्विति तच्छ्रेष्ठी प्रतिपद्याऽऽश्रयौ गृहम् ।
तद्दृष्ट्वा चिन्तयामास विस्मितः स महीपतिः ॥ ३१ ॥
अत्यद्भुतं भगवतो ज्ञानमस्य महीतले ।
प्रत्यक्षमिव येनोक्तं यद्दत्तं पूर्वजन्मनि ॥ ३२ ॥
पप्रच्छ च प्रभो ! मित्रानन्दस्य सुहृदः कथाम् ।
ममाप्याख्याहि कृत्वा त्वं प्रसादमतुलं मयि ॥ ३३ ॥
गुरुणोक्तं महाराज ! त्वत्प्रार्थ्याच्चलितोऽथ सः ।
जलदुर्गमतिक्रम्य स्थलदुर्गं ययौ क्रमात् ॥ ३४ ॥
तत्रैकत्र गिरिणदीप्रपाते तस्थिवानसौ ।
तदा भोक्तुं निविष्टास्ते सर्वेऽपि तव सेवकाः ॥ ३५ ॥

---

(१) ण द -द्य ययौ ।

कस्याश्चिद् दैवदुर्योगात् पल्लेर्मध्यात् समागता ।
पपात तत्र भिल्लानां धाटी तावदतर्किता ॥ ३६ ॥
सर्वेऽपि पत्तयो भिल्लैः प्रचण्डैस्ते पराजिताः ।
मित्रानन्दः स एकाकी कान्दिशीकः पलायितः ॥ ३७ ॥
क्रिया दर्शयितुं वक्त्रमत्तमास्ते पदातयः ।
केऽपि क्वापि ययुः पार्श्वं भवतः कोऽपि नाऽऽययौ ॥३८॥
मित्रो गच्छन्नरण्येऽथ ददर्शैकं सरोवरम् ।
तत्र पीत्वा च पानीयं न्यग्रोधस्य तलेऽ[1]स्वपत् ॥ ३९ ॥
ततोऽसौ क्षणसर्पेण निस्सृत्य वटकोटरात् ।
दष्टो दृष्ट्वा तत्रैकेनागतेन तपस्विना ॥ ४० ॥
विद्याऽभिमन्त्रितजलाभिषिक्तसकलाङ्गकः ।
करुणाऽऽपन्नचित्तेन तेन जीवापितस्ततः ॥ ४१ ॥
पृष्टश्चैवं त्वमेकाकी प्रस्थितोऽसि क्व भद्रक ! ।
तेनापि कथिता वार्त्ता सत्या तस्य स्वकीयका ॥ ४२ ॥
स्वस्थानं तापसः सोऽगाद् दध्यौ मित्रोऽपि हा मया ।
संप्राप्तमपि नो लब्धं सुखेन मरणं किल ॥ ४३ ॥
तन्मित्रसङ्गमस्यापि भ्रष्टोऽहं स्वकदाग्रहात् ।
अथवाऽद्यापि तत्पार्श्वं यामि किं चिन्तयाऽनया ॥ ४४ ॥
ततोऽसौ [2]चलितो मार्गे गृहीतस्तस्करैः पुनः ।
नीत्वा च निजपल्लीं तैर्विक्रीतो वणिगन्तिके ॥ ४५ ॥

---

(१) घ ण द -स्वपीत् ।
(२) क्ष द वलितो- ।

सोऽपि पारसकूलाख्ये देशे गन्तुमना वणिक् ।
उज्जयिन्यां पुरि प्राप्तोऽन्यदाऽवात्सीच्च तद्बहिः ॥ ४६ ॥
तत्र रात्रावसौ मित्रः कथञ्चिद् गतबन्धनः ।
पुर्यां निर्द्दमनेनान्तः प्रविवेश तदा पुनः ॥ ४७ ॥
तस्करोपद्रुता साऽभूत् ततो राज्ञा नियोजितः ।
आरक्षको विशेषेण चौरनिग्रहकर्मणि ॥ ४८ ॥ (युग्मम्)
प्रविशंश्चौरवत् तेन मित्रानन्दो निरीक्षितः ।
वद्ध्य केकिबन्धेन विपरीतविधेर्वशात् ॥ ४९ ॥
यष्टिमुष्ट्यादिभिर्घातैस्ताडयित्वा च निष्ठुरम् ।
वधार्थं स्वमनुष्याणामारक्षेण समर्पितः ॥ ५० ॥
अयं सिप्रानदीतीरे वटवृक्षे महीयसि ।
उद्बध्य वध्यो युष्माभिरिति चाज्ञापिता इमे ॥ ५१ ॥
ततस्तैर्नीयमानोऽसौ मनस्येवं व्यचिन्तयत् ।
जातं तद्वचनं सत्यं यच्छ्वेनोदितं पुरा ॥ ५२ ॥
यत्र वा तत्र वा यातु यद्वा तद्वा करोत्वसौ ।
तथाऽपि मुच्यते प्राणी न पूर्वकृतकर्मणा ॥ ५३ ॥
विभवो निर्धनत्वं च बन्धनं मरणं तथा ।
यत्र यस्य यदा लभ्यं तस्य तत्र तदा भवेत् ॥ ५४ ॥
याति दूरमसौ जीवोऽपायस्थानाद्भयद्रुतः ।
तत्रैवाऽऽनीयते भूयोऽहमिव प्रौढकर्मणा ॥ ५५ ॥
मा कार्षीः कोपमेतेषु रे जीव ! वधकेष्वपि ।
यदीच्छसि परत्रापि सुखलेशं त्वमात्मनः ॥ ५६ ॥

एवं विचिन्तयन्नेष तैरारक्षकपूरुषैः ।
तत्रोद्यो वटे नीत्वाऽपराधरहितोऽप्यहो ! ॥ ५७ ॥
अन्यदा रममाणानां गोपानां दैवयोगतः ।
उत्प्लुत्योन्नतिकाऽविक्षत् मुखे तस्यापि पूर्ववत् ॥ ५८ ॥
तत् सूरिवदनाच्छ्रुत्वाऽमरदत्तो महीपतिः ।
स्मारं स्मारं गुणग्रामं तस्यैवं व्यलपन्मुहुः ॥ ५९ ॥
हा मित्र ! निर्मलस्वान्त ! हा परोपकृतौ रत ! ।
हा प्रशस्यगुणव्रात ! हा भ्रातः ! क्व गतोऽसि हा ! ॥६०॥
देवी च विललापैवं हा देवर ! सखिप्रिय ! ।
सुविचार ! गुणाधार ! निर्विकार ! क्व तिष्ठसि ॥ ६१ ॥
यदाऽहं भवताऽऽनीता तदाऽनेके विनिर्मिताः ।
उपायाः स्वविपत्तौ ते क्व गता हा महामते ! ॥ ६२ ॥
उवाच सप्रियं भूपं विलपन्तमदो गुरुः ।
शोकं मा कुरु राजेन्द्र ! भवभावं विभावय ॥ ६३ ॥
न चतुर्गतिकेऽप्यस्मिन् संसारे परमार्थतः ।
सौख्यं शरीरिणामस्ति किन्तु दुःखं निरन्तरम् ॥ ६४ ॥
स कोऽपि नास्ति संसारे मृत्युना यो न पीडितः ।
सिद्धमार्गममुं ज्ञात्वा कः शोकं कुरुते सुधीः ॥ ६५ ॥
शोकाऽऽवेशं परित्यज्य राजन् ! धर्मोद्यमं कुरु ।
येनेदृशानां दुःखानां भाजनं नोपजायसे ॥ ६६ ॥
राज्ञा प्रोचे करिष्यामि धर्मं मे कथ्यतां परम् ।
मित्रानन्दस्य जीवोऽसौ कुलोत्पन्नो मुनीश्वर ! ॥ ६७ ॥

सूरिः प्रोवाच तं देव्याः सोऽस्याः कुक्षौ समागतः ।
सुतत्वेन यतस्तेन भावना भाविता तदा ॥ ६८ ॥
जातः कमलगुप्ताख्यस्तव पुत्रः सुविक्रमः ।
पूर्वं कुमारतां प्राप्य क्रमाद्राजा भविष्यति ॥ ६९ ॥
पुनः पप्रच्छ भूपालः कथं तस्य महात्मनः ।
जाता निरागसोऽप्येवं तस्करस्येव पत्त्वता ॥ ७० ॥
कलङ्कसम्भवो देव्याः कथं वा समभूत् प्रभो ! ।
मम बन्धुवियोगश्चाबाल्यादप्यभवत् कथम् ॥ ७१ ॥
स्नेहोऽधिकतरोऽस्माकं कथं वा भगवन् ! वद ।
इति पृष्टो मुनीन्द्रस्तु ज्ञात्वा ज्ञानेन सोऽवदत् ॥ ७२ ॥
इतो भवात् तृतीये त्वं भवे क्षेमङ्करामिधः ।
आसीः कौटुम्बिको राजन् ! सत्यश्रीस्तस्य गेहिनी ॥ ७३ ॥
चण्डसेनाभिधः कर्मकरः कर्मक्रियापटुः ।
बभूव च तयोर्भक्तोऽनुरक्तो विनयान्वितः ॥ ७४ ॥
तत्क्षेत्रे सोऽन्यदा कर्म कुर्वाणः कञ्चनाध्वगम् ।
परक्षेत्रे धान्यगम्बा[1] गृह्णन्तं समलोकयत् ॥ ७५ ॥
ऊचे चैनमहो चौरमुल्लम्बय तरावितिं ।
न क्षेत्रस्वामिना तस्य विदधे किञ्चनापि तु ॥ ७६ ॥
दूनस्तद्दत्तसा सोऽथाध्वगः कर्मकृताऽपि तत् ।
बद्धं क्रुधा चेष्टितेन कर्म दुर्वाक्यसम्भवम् ॥ ७७ ॥

---

(१) ञ ण द -सिङ्गा ।

वध्वाः सत्यश्रियस्तस्या भुञ्जानाया गृहेऽन्यदा ।
उत्तालाया: कथमपि कवलो व्यलगद् गले ॥ ७८ ॥
सोचे सत्यश्रिया पापे ! निशाचरि ! न भुञ्जसे ।
कवलैर्लघुभिः किं त्वं यथा नो विलगेद्गले ॥ ७९ ॥
अन्येद्युः कर्मकृत् सोऽथ स्वामिनोक्तो यथाऽद्य भोः ! ।
ग्रामेऽमुष्मिन् प्रयाहीति कारणेनामुना त्वकम् ॥ ८० ॥
सोऽवदद् व्याकुलोऽद्याहं बन्धूनां मिलनेन हि ।
कुपितेन च तेनोक्तं स्वजना मा मिलन्तु ते ॥ ८१ ॥
अत्रान्तरे मुनिद्वन्द्वं गृहे तस्य समागतम् ।
दानमस्मै प्रदेहीति भणिता चामुना प्रिया ॥ ८२ ॥
सुपात्रमिति हर्षेण तया तत्प्रतिलाभितम् ।
प्राशुकैर्भक्तपानाद्यैरकृताकारितैस्तथा ॥ ८३ ॥
दद्यौ कर्मकरोऽप्येतौ धन्यौ याभ्यां महामुनी ।
काले निजगृहायातौ भक्तितः प्रतिलाभितौ ॥ ८४ ॥
अत्रान्तरेऽपतत् तेषां त्रयाणामुपरि क्षणात् ।
क्षणिका तेन पञ्चत्वं सममेव गता हि ते ॥ ८५ ॥
सौधर्मकल्पे देवत्वं प्राप्ताश्च प्रीतिनिर्भराः ।
ततः क्षेमङ्करश्युत्वा त्वमभूर्जगतीपते ! ॥ ८६ ॥
जीवः सत्यश्रियः सेयं सञ्जाता रत्नमञ्जरी ।
जीवः कर्मकरस्याभूत् मित्रानन्दः सखा तव ॥ ८७ ॥
बद्धं यद् येन दुष्कर्म वचसा पूर्वजन्मनि ।
तत्तस्योपस्थितं राजन् ! युष्माकमिह जन्मनि ॥ ८८ ॥

ततः पूर्वभवे राजन् ! यदसद्भिर्निबध्यते ।
[1]रुदद्भिर्वेद्यतेऽवश्यं तत्कर्मेह शरीरिभिः ॥ ८८ ॥
तन्निगम्य महीपोऽसौ मुमूर्च्छ प्रियया सह ।
तत्पूर्वविहितं सर्वं जातिस्मृत्या विवेद [2]सः ॥ ८० ॥
ऊचे च यत्प्रभो ! प्रोक्तं युष्माभिर्ज्ञानभास्करैः ।
तज्जातिस्मरणेनाभूत् प्रत्यक्षमधुनाऽपि मे ॥ ८१ ॥
तदेतस्यामवस्थायां विद्यते यस्य योग्यता ।
कृत्वा प्रसादं युष्माभिः स धर्मो मम कथ्यताम् ॥ ८२ ॥
गुरुः प्रोवाच सज्ञाते तनये ते महीपते ! ।
प्रव्रज्या भवितेदानीं गृहिधर्मस्त्वोचितः ॥ ८३ ॥
ततो द्वादशभेदेन गृहिधर्मो विवेकिना ।
प्रपन्नोऽमरदत्तेन भूभुजा प्रियया सह ॥ ८४ ॥
पुनः पप्रच्छ भूपालो यत्तदा तेन जल्पितम् ।
सूतकेन तदाख्याहि कारणं विस्मयोऽत्र मे ॥ ८५ ॥
गुरुणोक्तमसौ पाप्यः [3]शम्बाग्राहो महीपते ! ।
[4]मृत्वा भ्रान्त्वा भवं तत्र वटेऽभूद् व्यन्तरः क्रमात् ॥ ८६ ॥
मित्रानन्दं समुद्दीक्ष्य स्मृत्वा वैरं च तत्कृतम् ।
अवतीर्य गवाक्षास्ये तेन तज्जल्पितं वचः ॥ ८७ ॥

(१) घ ङ ज थ रटद्भि- ।
(२) ङ ट ण ध द च ।
(३) क्ष ण द भिक्षा- ।
(४) ण द विपद्य व्यन्तरो जज्ञे वटे तस्मिन् स्वकर्मणा ।

इत्थं विच्छिन्नसन्देहोऽमरदत्तो महीपतिः ।
सूरिं नत्वा स्वसदनमाययौ सपरिग्रहः ॥ ९८ ॥
अज्ञानमोहितप्राणिप्रतिबोधविधौ रतः ।
धर्मघोषमुनीन्द्रोऽपि विजहार महीतले ॥ ९९ ॥
समये रत्नमञ्जर्यां देव्याः सूनुरजायत ।
तदैव समभूत् तस्य नाम यद् गुरुणोदितम् ॥ ४०० ॥
धात्रीभिः पालितः सोऽथ समतिक्रान्तशैशवः ।
समधीतकलो विश्वम्भराधारत्वमोऽभवत् ॥ १ ॥
स एव सुगुरुस्तत्र पुनरन्येद्युराऽऽययौ ।
उद्यानपालकस्तस्याऽऽगतिं राज्ञे शशंस च ॥ २ ॥
निवेश्य तनयं राज्ये ततोऽसौ प्रियया सह ।
गुरूणामन्तिके तेषां परिव्रज्यामुपाददे ॥ ३ ॥
राज्ञः सपरिवारस्य दत्त्वा दीक्षामथो गुरुः ।
तस्याऽन्येषां च बोधार्थं शिक्षामेवंविधां ददौ ॥ ४ ॥
भवाम्भोधिपतज्जन्तुनिस्तारणतरी क्षमा ।
कथञ्चित् पुण्ययोगेन प्रव्रज्या प्राप्यतेऽङ्गिभिः ॥ ५ ॥
प्रव्रज्यां प्रतिपद्यापि स्युर्यके विषयैषिणः ।
जिनरक्षितवद् घोरे ते पतन्ति भवार्णवे ॥ ६ ॥
स्युर्यके निरपेक्षास्तु विषयेष्वर्थिता अपि ।
जिनपालितवत्तेऽत्र भवन्ति सुखभाजिनः ॥ ७ ॥
पृष्टो राजर्षिणा तेन ततः कथयति स्म सः ।
सूरिः सिद्धान्तकथितां भविष्यन्तीं तयोः कथाम् ॥ ८ ॥

चम्पापुर्यां प्रसिद्धायां जितशत्रुरभून्नृपः ।
बभूव धारिणी नाम्नी तत्प्रिया रूपशालिनी । ९ ॥
अभवत्तत्र माकन्दी नाम्ना श्रेष्ठी महाधनः ।
प्रशान्तः सरलस्त्यागी बन्धुकैरवचन्द्रमाः ॥ १० ॥
[1]भद्रा नाम्नी च तद्भार्या [2]तत्सुतौ क्रमजावुभौ ।
जिनपालितनामाऽऽद्यो द्वितीयो जिनरक्षितः[3] ॥ ११ ॥
यानमारुह्य कुर्वद्भ्यां परदेशे गताऽऽगतम् ।
वारानेकादशाम्भूभ्यां निस्तीर्णः सरितां पतिः ॥ १२ ॥
अर्जितं हि धनं भूरि ततस्तावतिलोभतः ।
गन्तुकामौ पुनस्तत्राप्यृच्छतां पितरं निजम् ॥ १३ ॥

---

(१) ट ठ सद्धर्मकर्मनिपुणो गुरौ देवे च भक्तिमान् ।
दानशीलतपोभावधर्मं करोत्यनारतम् ॥ ११ ॥
भद्रा नाम्नी च तद्भार्या रूपलावण्यसंयुता ।
सतीत्वं पालयन्ती सा विनयादिगुणान्विता ॥ १२ ॥
तत्कुक्षिसम्भवौ शान्तौ तनयौ क्रमजावुभौ । इत्येवं पाठः ।

(२) ञ ण द तत्सुतौ ।

(३) इतिश्लोकानन्तरं ट ठ पुस्तके—

विद्याविनयसौन्दर्यलावण्यादिगुणान्वितौ ।
शैशवाद् यौवनं प्राप्तौ पित्रा तौ परिणायितौ ॥ १४ ॥
हिंसप्रतिकलायुक्तौ द्रव्योपार्जनतत्परौ ।
स्वदेशे परदेशे च यातायातौ सदैव तौ ॥ १५ ॥ इत्येवं पाठः ।

सोऽवदद् विद्यतेऽग्रेऽपि [1]हे वत्सौ ! प्रचुरं धनम् ।
निजेच्छया त्यागभोगौ तेनैव कुरुतं युवाम् ॥ १४ ॥
इयं च द्वादशी वेला भवेत् सोपद्रवाऽप्यसौ ।
ततो न युज्यते वार्द्धौ प्रयातुमिति मे मतिः ॥ १५ ॥
अथ तावूचतुस्तात ! मा वादीरीदृशं वचः ।
भाविन्येषाऽपि नौयात्रा चेमेण त्वत्प्रसादतः ॥ १६ ॥
ततस्तेन विसृष्टौ तावत्याग्रहपरायणौ ।
क्रयाणकं जगृहतुर्गणिमादि चतुर्विधम् ॥ १७ ॥
सामग्रीं सकलां कृत्वा जलादीनां च संग्रहम् ।
यानमारुह्य चार्णोधौ ततः प्रविशतः स्म तौ ॥ १८ ॥
तयोर्महासमुद्रान्तर्गतयोरभवत् क्षणात् ।
अकालदुर्दिनं व्योम्नि जगर्ज च बलाहकः ॥ १९ ॥
विललासासकृद् विद्युदूर्मयश्च जजृम्भिरे ।
वातश्च प्रबलो जज्ञे यानं तेन ननर्त तत् ॥ २० ॥
स्फुटितं च क्षणादेव विधुरेऽधीरचित्तवत् ।
विपन्नस्तन्नतो लोकस्तौ यानाधिपती पुनः ॥ २१ ॥
लब्ध्वा फलहकं किञ्चित् तद् गाढं परिरभ्य च ।
तीरमासेदतू रत्नद्वीपस्य दिवसैस्त्रिभिः ॥ २२ ॥ (युग्मम्) ।
नालिकेरीफलैस्तत्र प्राणयात्रां विधाय तौ ।
तत्तैलाभ्यङ्गयोगेन रूढदेहौ बभूवतुः ॥ २३ ॥

---

(१) क ख ट थ तनयौ ।

ततस्तत्राऽऽययौ रत्नद्वीपदे[1]वीति देवता ।
नृशंसा निर्घृणा पाणौ कृपाणं बिभ्रती शितम् ॥ २४ ॥
ऊचे चैवमहो मार्द्दं मया विषयसेवनाम् ।
चेद् युवां कुरुथः प्राणकुशलं वां ततो भवेत् ॥ २५ ॥
अन्यथाऽनेन खड्गेन शिरश्छेत्स्यामि निश्चितम् ।
इत्युक्ते भयभीताङ्गौ तावप्येवं जजल्पतुः ॥ २६ ॥
भिन्नप्रवहणावावां देवि ! त्वां शरणाऽऽश्रितौ ।
यदादिशसि किञ्चित्त्वं कर्तास्वस्तदसंशयम् ॥ २७ ॥
प्रासादमात्मनो नीत्वा तौ ततः प्रीतमानसा ।
अपजङ्घे तयोरङ्गात् पुद्गलानशुभानसौ ॥ २८ ॥
बुभुजेऽथ समं ताभ्यां स्वैरं वैषयिकं सुखम् ।
ताभ्यां सुधाफलाहारं ददौ च प्रतिवासरम् ॥ २९ ॥
एवं च तस्युषोर्यावद् गताः कत्यपि वासराः ।
तयोस्तत्रान्यदा तावत् तयैवं भणितावसौ ॥ ३० ॥
सुस्थितेनाऽहमादिष्टाऽधिष्ठात्रा लवणोदधेः ।
यथा त्रिः सप्तकृत्वस्त्वं भद्रे ! शोधय वारिधिम् ॥ ३१ ॥
तृणकाष्ठाशुचिप्रायं भवेद् यत् तत्र किञ्चन ।
सर्वं नीत्वा तदेकान्ते परित्याज्यं ममाज्ञया ॥ ३२ ॥
ततस्तत्र मया गम्यं युवामत्रैव तिष्ठतम् ।
कुर्वन्ती सत्फलैरेभिः प्राणवृत्तिं शुभाशयौ ॥ ३३ ॥

(१ च -देव्यधिदेवता ।

कथञ्चिद्दिजनत्वाद्दां यद्यत्रोत्पद्यतेऽरतिः ।
पूर्वदिग्वनखण्डे तद्गन्तव्यमपशङ्कितम् ॥ ३४ ॥
सर्वदाऽवस्थितौ तत्र ग्रीष्मप्रावृट्सुसंज्ञितौ ।
उभावृतू विनोदाय युवयोरपि भाविनौ ॥ ३५ ॥
न चेत् तत्राऽपि वां चित्तं रमेत कथमप्यहो ।
तदोत्तरवनखण्डे गन्तव्यं हि ममाज्ञया ॥ ३६ ॥
तत्राप्यवस्थितौ नित्यं शरद्धेमन्तनामकौ ।
भविष्यत ऋतू नाम स्वाधीनौ युवयोरपि ॥ ३७ ॥
तत्राऽपि नो रतिश्चेद्दां तत्रतीचीवनान्तरे ।
गम्यं तत्राऽपि शिशिरवसन्ताख्यावृतू स्थिरौ ॥ ३८ ॥
ततः प्रासाद एवाऽत्राऽऽगम्यमौत्सुक्यसम्भवे ।
दक्षिणस्या वनेऽमुष्मिन् गन्तव्यं न कथञ्चन ॥ ३९ ॥
यतस्तत्रासितच्छायो भुग्नकायो द्विजिह्वकः ।
अस्ति दृष्टीविषः सर्पो वेणीभूतोऽवनिस्थियः ॥ ४० ॥
एवमुक्त्वा ययावेषा माकन्दितनयौ च तौ ।
वनखण्डत्रये तस्मिन् गच्छतः स्म पुरोदिते ॥ ४१ ॥
अथाचिन्तयतां चैवं दक्षिणस्या दिशो वने ।
पौनःपुन्येन गच्छन्तौ तयाऽऽवां वारितौ कथम् ॥ ४२ ॥
चिन्तयित्वेति साशङ्कौ [1]यावत्तौ तत्र गच्छतः ।
प्रविवेश तयोस्तावद् घ्राणे गन्धः सुदुःसहः ॥ ४३ ॥

---

(१) ग यावत्तौ दक्षिणां गतौ । ञ द यावत्तत्रेयतुस्तकौ ।

स्थगयित्वोत्तरीयेण नामारन्ध्रे ततश्च तौ ।
रात्रिं नरकरङ्काणां वने तस्मिन्नपश्यताम् ॥ ४४ ॥
भयभीतौ विशेषेणाऽऽलोकयन्तावितो वनम् ।
नरमेकं च तौ प्रेक्ष्याक्रातं शूलिकागतम् ॥ ४५ ॥
जीवन्तं विलपन्तं च दृष्ट्वा पप्रच्छतुश्च तम् ।
कस्त्वं भद्र ! कथं वा तेऽवस्थेयं के त्वमी गवाः ॥ ४६ ॥
सोऽप्यवोचत [1]कायन्दीपुर्वास्तव्योऽस्म्यहं वणिक् ।
भग्नं वारिनिधौ यानं वाणिज्येनाऽऽगतस्य मे ॥ ४७ ॥
[2]ततश्चेहागतो रत्नद्वीपदेव्याऽभिकामितः ।
स्तोकापराधेऽप्यन्येद्युस्तयैवं निहितोऽस्म्यहम् ॥ ४८ ॥
तयैवं [3]विहिताश्चैतेऽनया प्रक्रियया गवाः ।
तद् युवां कुत आयातौ प्राप्तौ चास्या गृहे कथम् ॥ ४९ ॥
ततस्तावात्मनो वार्तां निवेद्य तमपृच्छताम् ।
भद्र ! नौ जीवनोपायः कोऽप्यस्त्येवंस्थिते सति ॥ ५० ॥
सोऽवदच्छैलको नाम्ना यक्षः पूर्ववनेऽस्ति भोः ! ।
सोऽश्वरूपधरः पर्वदिनेष्वेवं प्रजल्पति ॥ ५१ ॥
कं रक्षामि नरं कं वा विपदं तारयाम्यहम् ।
तद् गत्वा यक्षराजं तं भक्त्याऽऽराधयतं युवाम् ॥ ५२ ॥

---

(१) ङ ज, काकन्दीपुर्या वास्तव्योऽहं वणिक् । ज ञ ट ठ ड ण त थ द, कायन्दी-पुर्य्यस्थानामहं वणिक । च, कायन्दीपुर्यस्त्यस्यामहं वणिक् ।

(२) ङ ञ ण दृतश्चे-

(३) ण निहता-

उद्घोषणायां जातायामावां रक्षेति जल्पतम् ।
इति शिक्षां तयोर्दत्त्वा स नरः संस्थितस्ततः ॥ ५३ ॥
पूजयामासतुः पुष्पैर्यक्षं गत्वा च तत्र तौ ।
आवां निस्तारयेत्याशु तदुक्तौ च जजल्पतुः ॥ ५४ ॥
उवाच शैलको निस्तारयिष्यामि युवामहम् ।
एकं त्ववहितौ भूत्वा वाक्यं संशृणुतं मम ॥ ५५ ॥
युवयोर्गच्छतोः पृष्ठे देवता सा समेष्यति ।
सानुरागसकामानि जल्पिष्यति वचांस्यपि ॥ ५६ ॥
अनुरागं ततस्तस्यां युवां यदि करिष्यथः ।
ततश्चोल्लालयित्वाऽहं प्रक्षेप्स्यामि महोदधौ ॥ ५७ ॥
यदि वा निरपेक्षौ हि तस्यां ननु भविष्यथः ।
ततः क्षेमेण चम्पायां प्रापयिष्यामि निश्चितम् ॥ ५८ ॥

॥ किं बहुना ॥

संमाननं न दृष्ट्याऽपि तस्याः कार्यं कथञ्चन ।
न भेत्तव्यं भयं तस्यां दर्शयन्त्यामपि स्फुटम् ॥ ५९ ॥
व्यवस्थयाऽनया खं भोः ! शक्तौ निर्वोढुं यदि ।
तन्ममाऽऽरुहतं पृष्ठं शीघ्रं येन नयाम्यहम् ॥ ६० ॥
ततस्तत्पृष्ठमारूढौ तावङ्गीकृत्य तद्वचः ।
उत्पत्य नभसा सोऽपि ययौ मध्येमहोदधेः ॥ ६१ ॥
अत्रान्तरे च देवी साऽपश्यन्ती तौ स्ववेश्मनि ।
बभ्राम वनखण्डेषु तत्राऽप्येतौ ददर्श न ॥ ६२ ॥

ततो ज्ञानोपयोगेन ज्ञात्वा तद्गमनं तयोः ।
दधावे खड्गमादाय पृष्ठे कोपपराऽमको ॥ ६३ ॥
दृष्ट्वा च तावुवाचैवं रे ! किं यायो विमुच्य माम् ।
पुनरागच्छतं स्वस्य जीवितं वाञ्छतो यदि ॥ ६४ ॥
नोचेदनेन खड्गेन पातयिष्यामि वां शिरः ।
तयेत्युक्तेऽथ यक्षेण भणितौ ताविदं पुनः ॥ ६५ ॥
मम पृष्ठे स्थितावस्या मा भैष्टं भोः ! कथञ्चन ।
इति संधोरितावेतौ स्थिरचित्तौ बभूवतुः ॥ ६६ ॥
ततोऽनुकूलवाक्यानि जजल्पैवममौ यथा ।
मां मुक्त्वैकाकिनीं दीनां क्व प्रियौ प्रस्थितौ युवाम् ॥ ६७ ॥
इत्यादिदीनवचनैस्तया भणितयोरपि ।
न चचाल तयोश्चित्तं यक्षावष्टम्भशालिनोः ॥ ६८ ॥
ततोऽमौ भेदनिष्णाता प्रत्यूचे जिनरक्षितम् ।
मम प्रियो विशेषेण त्वमेवासि महाशय ! ॥ ६९ ॥
ईक्षणाऽऽलापसंमानक्रियासाम्येऽपि देहिनाम् ।
चित्ताह्लादकरं प्रेम कस्मिंश्चिदपि जायते ॥ ७० ॥
एवं ममाऽपि कुर्वत्या युवाभ्यां सह सङ्गतिम् ।
जिनरक्षित ! मद्भावे स्नेहस्त्वय्येव निश्चलः ॥ ७१ ॥
तदेहि देहि हे कान्त ! ममैकान्तरतेः सुखम् ।
अन्यथाऽहं मरिष्यामि त्वद्वियोगरुजाऽर्दिता ॥ ७२ ॥
नाथानाथां म्रियमाणां दृष्ट्वा मां किं न वीक्षसे ।
ददाति रागिणी प्राणानित्यर्थे संशयो नु किम् ॥ ७३ ॥

तत्कूटमोहितः सोऽथ तत् सत्यमिति चिन्तयन् ।
दृष्ट्वाऽऽलोकयते स्मास्या दुर्गतेरिव संमुखम् ॥ ७४ ॥
यक्षेणोल्लालयित्वाऽथ क्षिप्तः सोऽथ स्वपृष्ठतः ।
तया नीरमसंप्राप्तस्त्रिशूलेन प्रतीच्छितः ॥ ७५ ॥
लभस्व पाप ! रे सद्यो मम वञ्चनजं फलम् ।
इत्युदित्वा च खड्गेन खण्डयित्वा निपातितः ॥ ७६ ॥
ततश्च कूटकपटरचनानाटिका नटी ।
प्रत्याययितुमारेभे चाटुभिर्जिनपालितम् ॥ ७७ ॥
यक्षेण भणितः सोऽथ यदास्या वचने रुचिः ।
भविष्यति गतिस्तत्ते कनिष्ठस्येव निश्चितम् ॥ ७८ ॥
जातो निश्चलचित्तोऽसौ तं कूटमवधूय तत् ।
क्षेमेण सह यक्षेण प्राप्तः चम्पापुरीं निजाम् ॥ ७९ ॥
वलिता व्यन्तरी साऽथ यक्षोऽपि वलितः सकः ।
क्षामितः कृतकृत्येन श्रेष्ठिपुत्रेण भक्तितः ॥ ८० ॥
गेहे गत्वा स्वलोकस्य मिलितो जिनपालितः ।
कथयामास तद्बन्धुमरणं शोकसङ्कुलम्[1] ॥ ८१ ॥
मृतकार्याणि तस्याऽथ माकन्दी स्वजनान्वितः ।
विधाय पालयामास गृहवासं सुतश्च सः ॥ ८२ ॥
अन्यदा समवासार्षीत् तत्र वीरजिनेश्वरः ।
तं नन्तुं जग्मतुश्चैतौ माकन्दिजिनपालितौ ॥ ८३ ॥

---

(१) ङ च छ शोकसंकुलः ।

श्रुत्वा तदन्तिके धर्मं प्रतिबुद्धो महाशयो ।
जातव्रतपरीणामो जिनं नत्वेयतुर्गृहम् ॥ ८४ ॥
पौत्रे भारं कुटुम्बस्य विन्यस्य सुतसंयुतः ।
स श्रेष्ठी परिवव्राज श्रीवीरजिनमन्त्रिधौ ॥ ८५ ॥
पित्रा समन्वितः सोऽथ जिनपालितसंयुतः ।
स्वकार्यसाधको जज्ञे तपः कृत्वा सुदुश्चरम् ॥ ८६ ॥
कथयित्वा कथामेतां धर्मघोषमुनीश्वरः ।
राजर्षेरमरस्योपनयं कथयति स्म सः ॥ ८७ ॥
यथा तौ वणिजौ तद्वद् जीवाः संसारिणोऽखिलाः ।
रत्नद्वीपदेवतेवाऽविरतिः परिकीर्तिता ॥ ८८ ॥
तथाऽविरतिजं दुःखं यथाऽस्याः शब्दसञ्चयः ।
शूलागतनरो यद्वद् हितभाषी गुरुस्तथा ॥ ८९ ॥
यथा तेन तत्स्वरूपमनुभूतं निवेदितम् ।
तथैवाविरतेर्दुःखं गुरुराख्याति देहिनाम् ॥ ९० ॥
यथाऽसौ शैलको यक्षस्तारकः संयमस्तथा ।
समुद्र इव संसारस्तरणीयोऽमुना ध्रुवम् ॥ ९१ ॥
यथा तस्या वशीभूतो विनष्टो जिनरक्षितः ।
तथैवाऽविरतेर्जन्तुर्वशीभूतो विनश्यति ॥ ९२ ॥
देवतोक्तिनिराकाङ्क्षी यक्षादेशमखण्डयन् ।
क्षेमेण स्वपुरं प्राप्तो यथाऽसौ जिनपालितः ॥ ९३ ॥
विरतोऽविरतेस्तद्वच्चारित्रमविराधयन् ।
निष्कर्मा जायते प्राणी निर्वाणसुखभाजनम् ॥ ९४ ॥

तद् भोः ! प्रपद्य श्रामण्यं पुनर्भोगेषु नो मनः ।
कर्त्तव्यमिति सन्दिष्टे गुरुणा मुमुदे मुनिः ॥ ९५ ॥
समर्पिता प्रवर्तिन्यास्ततोऽसौ रत्नमञ्जरी ।
कृत्वोदारं तपस्तौ द्वौ संप्राप्तौ परमं पदम् ॥ ९६ ॥

॥ इति मित्रानन्दामरदत्तकथानकं समाप्तम् ॥

स्वयंप्रभमुनेर्धर्मोपदेशमतिपावनम् ।
श्रुत्वैवं प्रतिबुद्धोऽसौ राजा स्तिमितसागरः ॥ ९७ ॥
अनन्तवीर्यं भूपत्वे, कुमारत्वेऽपरं सुतम् ।
विन्यस्यास्य मुनेः पार्श्वे स दीक्षां समुपाददे ॥ ९८ ॥
विराध्य मनसा किञ्चित् सोऽन्तकालेऽनगारताम् ।
मृत्वाऽधो भुवने जज्ञे चमरेन्द्रोऽसुराऽधिपः ॥ ९९ ॥
इतोऽपराजितानन्तवीर्ययोर्विभुताजुषोः ।
विद्याधरेण केनाऽपि मैत्री सममजायत ॥ ५०० ॥
दत्ता विद्यास्तेन ताभ्यां विहायोगमनक्षमाः ।
सर्वा तत्साधनोपायसामग्री च निवेदिता ॥ १ ॥
बर्बरीति चिलातीति गीतनाट्यकलाविदौ ।
तयोर्बभूवतुर्दास्यौ विनोदास्पदमद्भुतम् ॥ २ ॥
अन्यदा स्नानमासीनौ सन्नाट्यक्रियया तयोः ।
अभूतां व्याकुलौ यावत् तौ बन्धू रङ्गनिर्भरौ ॥ ३ ॥
तावत् तत्र ब्रह्मधारी स्वेच्छाचारी कलिप्रियः ।
सम्यग्दर्शनपुण्यात्मा नारदर्षिरुपाययौ ॥ ४ ॥

नामाव[1]भ्युत्थितस्ताभ्यामाक्षिप्ताभ्यां ततश्च सः ।
रुष्टो व्यचिन्तयदिमौ चेटीनाट्येन मोहितौ ॥ ५ ॥
वित्तो मामपि नायातं ततोऽमू चेटिके ध्रुवम् ।
महामाचे कलापाचे हारयिष्यामि केनचित् ॥६॥ (युग्मम्)
विद्याधराधिराजस्य चिखण्डविजयेशितुः ।
प्रतिविष्णोर्दमितारेः सकाशे स ययौ ततः ॥ ७ ॥
अभ्युत्थानादिसत्कारं कृत्वाऽसावासनस्थितम् ।
पप्रच्छ तं मुनिं दृष्टं पृथिव्यां किञ्चिदद्भुतम् ॥ ८ ॥
सोऽवदच्छृणु राजेन्द्र ! सुभगायाः पुरो विभोः ।
अनन्तवीर्यभूपस्य समीपे गतवानहम् ॥ ९ ॥
[2]तद्बर्बरिचिलात्याख्यचेट्योर्नाट्यक्रिया वरा ।
मयाऽवलोकिता तत्र विश्वविस्मयकारिणी ॥ १० ॥
किं विद्याभिः प्रचण्डाभिः किं राज्येन किमाज्ञया ।
ते विना तत्र भूपेति गदित्वा नारदो ययौ ॥ ११ ॥
तेनाऽथ प्रेषितो दूतः स गत्वा तत्र सत्वरम् ।
इदमूचे तयोरग्रे स्वस्वामिबलगर्वितः ॥ १२ ॥
हंहो भवन्ति रत्नानि राजगामीनि निश्चितम् ।
चेट्यौ नाट्यविधायिन्यौ तदेते अर्पयतां प्रभोः ॥ १३ ॥

---

(१) द -भ्यर्चित- ।

(२) त ठ तद्बर्बरिचिलात्याख्ये चेट्यौ नाट्यक्रियावरे ।
मया विलोकिते तत्र विश्वविस्मयकारिके ॥ १० ॥

तावेवमूचतुर्भद्र ! युक्तं त्वं ननु जल्पसि ।
आलोच्यैतत् करिष्यावो याहि त्वं स्वामिनोऽन्तिके ॥ १४ ॥
दूतं विसृज्य तावेवं मन्त्रयांचक्रतुर्यथा ।
विद्याबलेन नौ तावत् करोत्येष पराभवम् ॥ १५ ॥
आवामपि ततो विद्याः साधयित्वा स्वचित्तगाः ।
दर्पमस्य हरिष्याव इति चिन्तयतोस्तयोः ॥ १६ ॥
पूर्वजन्मसाधितास्ताः स्वयमेवोपतस्थिरे ।
ग्रंसित्वा सिद्धमात्मानं विविशुश्च तदन्तिके ॥ १७॥(युग्मम्)
जातौ विद्याधरौ तौ द्वौ तत्प्रभावान्महोजसौ ।
विद्यानां चक्रतुश्चार्चां गन्धमाल्यादिवस्तुभिः ॥ १८ ॥
अत्रान्तरे पुनर्दूतः प्राप्तस्तस्य महीपतेः ।
जजल्पैवमहो मृत्योरतिथी किं भविष्यथः ॥ १९ ॥
येन नाद्याऽपि चेष्टो ते कृते प्रेषयथः प्रभोः ।
तावूचतुश्च कर्तव्यमवश्यं स्वामिनो हितम् ॥ २० ॥
ततस्तद्दुहितुः स्वर्णश्रियो लोभेन तावुभौ ।
चेष्टो रूपं तयोः कृत्वा जग्मतुस्तत्पुरे द्रुतम् ॥ २१ ॥
कलाकौशलमालोक्य भणितौ तौ महीभुजा ।
युवाभ्यां करणीयो हि विनोदः कनकश्रियः ॥ २२ ॥
यथौतुर्दुग्धरक्षायां क्षुद्वान् सिद्धान्नरक्षणे ।
हृष्टो भवेत् तथाऽभूतां तदादेशे नृपस्य तौ ॥ २३ ॥
सा कामगृहिणीरूपा दृष्टा ताभ्यां सुकन्यका ।
सर्वोपमादलौघैर्या विधिनेव विनिर्मिता ॥ २४ ॥

आभाषि भावमधुरैः परिहासमनोहरैः ।
देशीभाषासगर्भैश्च प्रियालापैः ससंभ्रमम् ॥ २५ ॥
पप्रच्छ सा च तत्पार्श्वेऽनन्तवीर्यस्वरूपताम् ।
ततोऽपराजितोऽशंसत् तदग्रे तद्गुणानिति ॥ २६ ॥
रूपचातुर्यगाम्भीर्यवीर्यौदार्यादिसद्गुणाः ।
शक्या ह्यनन्तवीर्यस्य शंसितुं नैकजिह्वया ॥ २७ ॥ (युग्मम्)

किञ्च

कुटिलः सरलाङ्गेन विश्रुतिः श्रुतिशालिना ।
द्वेषोऽपि निर्जितो येन क्षमाभृद् बिभ्रता क्षमाम् ॥ २८ ॥
सञ्जातरोमहर्षां तां दृष्ट्वा पुनरभाषत ।
यद्यस्ति कौतुकं तत्ते दर्शयाम्यधुनैव तम् ॥ २९ ॥
आमेति तकया प्रोक्ते तावभूतां स्वरूपिणौ ।
दृष्ट्वा जगाद सा चाहं युष्मदाज्ञाकरी खलु ॥ ३० ॥
विष्णुः प्रोवाच यद्येवमेहि यामो निजां पुरीम् ।
जजल्प सा च मत्तातो विधाता वां पराभवम् ॥ ३१ ॥
भणिता सा ततस्ताभ्यां भेतव्यं न हि सर्वथा ।
आवयोः समरे नैष पुरः स्थातुं क्षणं क्षमः ॥ ३२ ॥

ङ ञ ढ ण द पुस्तकेषु भूयान् पाठभेद एषः—

भणिता सा ततस्ताभ्यां भेतव्यं सुभ्रु ! न त्वया ।
आवां त्वज्जनकं जेतुं शक्तौ सबलवाहनम् ॥ ३२ ॥

तयोरिति वचः श्रुत्वा प्रेमपाशनियन्त्रिता ।
विस्मिता रूप[1]सूर्याभ्यामाभ्यां सह चचाल सा ॥ ३३ ॥
विमानं विद्यया कृत्वा समारुह्य नभःस्थितः ।
उवाचानन्तवीर्योऽथ दमितारिं सदःस्थितम् ॥ ३४ ॥
भो भोः ! सामन्तमन्त्रग्राद्याः ! सेनाध्यक्षाः ! नृपस्य ये ।
शृण्वन्त्वपहरन्नस्मि सुतां युष्मत्पतेरिमाम् ॥ ३५ ॥
न वाच्यं तेन भावेन [2]गृहीताऽस्माकमजानताम् ।
इत्युद्गीर्य्यानन्तवीर्यो नभोऽगात् सपरिग्रहः ॥ ३६ ॥
तदाकर्ण्य ज्वलत्कोपकरालः प्रतिकेशवः ।
रे रे ! गृह्णीत गृह्णीत दुरात्मानममुं जवात् ॥ ३७ ॥

---

(१) क ख ठ त, रूपशौर्याभ्यां ।
(२) ख हृताऽस्मा- । ठ -नाद्याहृाऽ- ।

ततः सा प्रस्थिताऽनन्तवीर्येणैवमथोदितम् ।
सर्वे शृणुत भो लोकाः ! दमितारिश्च भूपतिः ॥ ३३ ॥
अनन्तवीर्यनामाऽहं निजभ्रात्रसमन्वितः ।
सहसा हरामि कनकश्रियं स्नेहवतीमिमाम् ॥ ३४ ॥
विद्याविनिर्मितविमानाऽधिरूढौ ततश्च तौ ।
नभसा गन्तुमारब्धौ तां गृहीत्वा नृपात्मजाम् ॥ ३५ ॥
दमितारिन्नृपेणाऽथ प्रेषिताः सुभटा निजाः ।
तदोत्पन्नास्त्ररत्नाभ्यां *सुभटास्ते पराजिताः ॥ ३६ ॥
दमितारिः स्वयं सोऽथ महाबलसमन्वितः ।
हन्तुमेतावधाविष्ट दुष्टो दृष्टाधरः क्रुधा ॥ ३७ ॥

---

* ञ ण द ताभ्यां सद्यः पराजिताः ।

खेचरा हुं प्रकुर्वन्तः क्व गमिष्यसि दुर्मते ! ।
अन्वधावन् गृहीतास्त्रा मृगारेरिव जम्बुकाः ॥ ३८ ॥
एतान् विद्रावयामास तृणं वायुः क्षणादिव ।
विष्णुस्तांश्च तथा दृष्ट्वा दमितारिरथाचलत् ॥ ३९ ॥
कल्पान्त इव पायोधिर्वेलोर्मिकुलसङ्कुलः ।
गजाश्वपत्तिग्रा'हाक्रस्तद्विरावघनध्वनिः ॥ ४० ॥
तमायान्तमथालोक्य भीरुं भयसमाकुलाम् ।
आश्वास्य रचयामास नागकारि रिपोर्बलम् ॥ ४१ ॥
तयोर्नामीरवीराणां प्रतिकेशवशार्ङ्गिणोः ।
कलिः कलकलारावसङ्कुलः समभूत् तदा ॥ ४२ ॥

---

(१) क ख, -ग्राक्षोभ्य-।

कृतान्तमिव संक्रुद्धं समायान्तं विलोक्य तम् ।
विभाय कनकश्रीः सा ताभ्यां चाश्वासिता पुनः ॥ ३८ ॥
संग्रामे संसखीनौ तावित्युक्तौ दमितारिणा ।
भो ! भोः ! समर्थ्य मे पुत्रीं जीवन्तौ गच्छतं युवाम् ॥ ३९ ॥
लभेतां मा पतङ्गत्वं मम कोपद्रुताग्नने ।
तावूचतुश्च याहि त्वं मा स्त्रियस्व सुधैव रे ! ॥ ४० ॥
ततोऽपराजितानन्तवीर्ययोः सप्तपस्थितम् ।
चतुरङ्गबलं ताभिर्विद्याभिर्विहितं क्षणात् ॥ ४१ ॥
क्षणमेकमथो युद्धमुभयोः सैन्ययोरभूत् ।
विश्वस्य विश्वयोऽधायि विद्याजनितमायया ॥ ४२ ॥

प्रत्यनीकभटैर्भग्नं वीक्ष्य सैन्यं निजं हरिः ।
किञ्चिच्चिन्तावशो जज्ञे रत्नान्युत्पेदिरे तदा ॥ ४३ ॥
वनमाला गदा खड्गो मणिः शङ्खो धनुस्तथा ।
प्रत्यर्द्धचक्रिणश्चक्रं सप्तमं तद् भविष्यति ॥ ४४ ॥
याञ्चजन्यमथादायानन्तवीर्यो महौजसा ।
दध्मौ ध्मानेन तस्याशु शत्रुसैन्यं समूर्च्छ च ॥ ४५ ॥
बलमुत्साहवत् जातं निजं विष्णोस्तदाऽखिलम् ।
सर्वाभिसारतस्तावद् डुढौके दमितार्यपि ॥ ४६ ॥
संवर्म्य रथमारुह्य शस्त्राण्यादाय भूरिशः ।
उत्तस्थौ केशवश्चापि तथैव ह्यपराजितः ॥ ४७ ॥

उपशान्ते ततस्तस्मिन् दमितारिर्महाभुजः ।
युध्यते स्म समं ताभ्यां दिव्यास्त्रैस्तिमिरादिभिः ॥ ४३ ॥
तानि शस्त्राणि तस्याशु प्रतिशस्त्रैर्महाभुजौ ।
निर्भाग्यस्येप्सितानीव विफलीचक्रतुस्तकौ ॥ ४४ ॥
जातसर्वास्त्रवैफल्यो दमितारिरमर्षणः ।
दध्यौ हा धिक् कथमहं शत्रुणाऽनेन निर्जितः ॥ ४५ ॥
विफलत्वं यथा जग्मुर्दिव्यास्त्राण्यखिलान्यपि ।
भविता चक्रमप्येवं प्रतिहन्तुं तथैव किम् ॥ ४६ ॥
किं वा प्रनष्टमेवेदं नायात्यद्यापि यत् करे ।
इति चिन्तापरस्यास्य हस्ते तच्छीघ्रमाययौ ॥ ४७ ॥

---

* ज ट चक्रमप्येतं ।

वहन्ति चासृजां नद्यो मौलिपङ्कजभीषणाः ।
नृत्यन्ति च कबन्धानि रणरङ्गावनौ तदा ॥ ४८ ॥
दमितारिप्रयुक्तानि शस्त्राण्यपि क्षणात् पुनः ।
सर्वाण्यनाशयत् शार्ङ्गी नवोदयवशात् तदा ॥ ४९ ॥
दीपयन्तं दिशश्चक्रं स्मृतमात्रमुपागतम् ।
मुक्तमेतेन तुम्बेनाहत्य तस्थौ करे हरेः ॥ ५० ॥
तदादाय जगौ विष्णुर्भुङ्क्ष्व राज्यं म्रियस्व मा ।
कनकश्रीपितेति त्वं मया मुक्तः प्रयाहि भोः ! ॥ ५१ ॥
सोऽवोचन्मयका मुक्तं यथा मोघमभूदिदम् ।
तथा त्वया विनिर्मुक्तमपि भावीति मे मतिः ॥ ५२ ॥
अथवा मण्डलाग्रेण तच्चक्रं त्वां च घातकम् ।
अनेन खण्डयिष्यामीत्युक्त्वाऽधावत सोऽम्बरे ॥ ५३ ॥
खड्गखेटकभृत् खस्थाभिमुखं च समापतन् ।
अनन्तवीर्यमुक्तेन चक्रेणाशु निपातितः ॥ ५४ ॥

तत् तेन मुक्तमागत्यानन्तवीर्यस्य वक्षसि ।
विशाले लगति स्रोरुनाभिना न तु धारया ॥ ४८ ॥
क्षणमेकमसौ मूर्च्छां लेभे घातेन तस्य च* ।
तस्यावस्थैव सविधे भेदिना†ऽन्येन भेदितम् ॥ ४९ ॥
ततोऽसौ तत् समादाय दमितारिमदोऽवदत् ।
अरे ! त्वं निजचक्रेण मन्मुक्तेन मरिष्यसि ॥ ५० ॥

---

* अ ण. तत् ।
† अ ण द. भेदनीत्येव भेदितम ।

ततश्चानन्तवीर्यस्योपरि पुष्पभरोऽम्बरात् ।
विमुक्तो व्यन्तरैरेवं प्रजल्पद्भिः प्रमोदतः ॥ ५५ ॥
संजातो वासुदेवोऽयं विजयार्द्धपतिर्बली ।
द्वितीयो बलदेवश्च तच्चिरं जयतामिमौ ॥ ५६ ॥
विद्याधरभटास्तेऽथानन्तवीर्यं समाश्रिताः ।
कृतप्रणामास्तेनापि सर्वे संमानिता इमे ॥ ५७ ॥
ततोऽपराजितानन्तवीर्यौ विद्याधरान्वितौ ।
रम्यं विमानमारूढौ चेलतुः स्वपुरीं प्रति ॥ ५८ ॥
कनकाद्रावथ प्राप्तौ प्रोक्तौ विद्याधरैरिमौ ।
सन्त्यत्र जिनचैत्यानि युज्यन्ते तानि वन्दितुम् ॥ ५९ ॥
ततोऽवतीर्य्य चैत्यानि वन्दित्वा तानि भक्तितः ।
तत्रावलोकितस्ताभ्यां मुनिः कीर्तिधराभिधः ॥ ६० ॥
वर्षोपवासतपसोत्पन्नकेवलचक्षुषः ।
तस्यर्षेश्चरणावेतौ नेमतुः परया मुदा ॥ ६१ ॥
उपविश्य धरापीठे हर्षोदञ्चितविग्रहौ ।
इति शुश्रुवतुश्चास्य विशुद्धां धर्मदेशनाम् ॥ ६२ ॥

तद्यथा—

मिथ्यात्वमविरतिश्च कषाया दुःखदायिनः ।
प्रमादा दुष्टयोगाश्च पञ्चैते बन्धकारणम् ॥ ६३ ॥
यद् देवत्वमदेवेषु गुरुत्वमगुरौ तथा ।
अतत्त्वे तत्त्वबुद्धिश्च तन्मिथ्यात्वं प्रकीर्त्तितम् ॥ ६४ ॥

---

(१) घ च ज ठ -श्चोभौ ।

यत्र कर्मसु पापेषु न स्तोकमपि वर्जनम् ।
जानीथोऽविरतिं तां हि सर्वदुःखनिबन्धिनीम् ॥ ६५ ॥
कोपो मानश्च माया च लोभश्चेति निवेदिताः ।
मूलं संसारवामस्य कषाया जिनशासने ॥ ६६ ॥
क्षान्तेर्विपर्ययः कोपो मानोऽमार्दवसंज्ञितः ।
मायाऽऽर्जवस्य वैरूप्यं लोभो मुक्तेर्विपर्ययः ॥ ६७ ॥
मदिरा विषयाश्चैव निद्राश्च विकथास्तथा ।
प्रमादाः कथिताः पञ्च कषायसहिता इमे ॥ ६८ ॥
काष्ठपिष्टादिनिष्पन्ना कथिता मदिरा द्विधा ।
शब्दरूपरसगन्धस्पर्शाख्या विषयास्तथा ॥ ६९ ॥
निद्रा च निद्रानिद्रा च तृतीया प्रचलाऽभिधा ।
प्रचलाप्रचला तुर्या स्त्यानर्द्धिः पञ्चमी भवेत् ॥ ७० ॥
[1]सुखबोधा भवेन्निद्रा दुःखबोधाऽतिनिद्रिका ।
प्रचला संनिविष्टस्य चतुर्थी गच्छतो भवेत् ॥ ७१ ॥
दिनचिन्तितकार्यस्य साधनी पञ्चमी [2]पुनः ।
सा तूदये भवेज्जन्तोरतिसंक्लिष्टकर्मणः ॥ ७२ ॥
स्त्रीकथा भक्तवार्ता च राजदेशकथा तथा ।
चतस्रो विकथा एता वर्जनीया विवेकिना ॥ ७३ ॥

---

(१) घ ङ च ज झ, सुखबोधो भवेन्निद्रा दुःखबोधोऽति-।
(२) घ च ज झ, भवेत् ।

मनोवचनकाया[1]ख्यास्त्रयो योगाः प्रकीर्तिताः ।
अप्रशस्ता भवन्त्येते कर्मबन्धस्य हेतवः ॥ ७४ ॥
सर्वमेतत् परित्यज्य पापकर्मनिबन्धनम् ।
विदधीत मतिं धर्मे भव्यो मुक्तिसुखप्रदे ॥ ७५ ॥
अत्रान्तरे कनकश्रीः सा पप्रच्छेति तं मुनिम् ।
अभूद्बन्धुवियोगो मे पितुर्मृत्युश्च किं प्रभो ! ॥ ७६ ॥
ततः कीर्तिधरेणोक्तं तद् भद्रे ! शृणु कारणम् ।
येन बन्धुवियोगादि तव दुःखमभूदितः[2] ॥ ७७ ॥
अस्त्यत्र धातकीखण्डे द्वीपे प्राग्भरते पुरम् ।
नाम्ना शङ्खपुरं भूरिधनधान्यसमाकुलम् ॥ ७८ ॥
काचिदुच्छिन्नसन्ताना श्रीदत्ता नाम दुर्गता ।
तत्राभूदबला कर्मकरणावाप्तजीवना ॥ ७९ ॥
पीडिता दुर्गतत्वेन निशम्य मुनिसन्निधौ ।
चकार साऽन्यदा धर्मचक्रवालाभिधं तपः ॥ ८० ॥
त्रिरावृत्तितयं तत्र प्रथमं क्रियते तपः ।
सप्तचिंशच्चतुर्थानि शक्त्याऽऽर्चा गुरुदेवयोः ॥ ८१ ॥
ददौ तस्यै जनः सर्वः संप्रीतः पारणाहनि ।
मनोज्ञभक्ष्यभोज्यादि[3] तपो हि महितं जने ॥ ८२ ॥

---

(१) घ च झ -नां त्रियोगाश्च । ज -नां त्रयो- ।
(२) ख घ च ज झ -र्दति ।
(३) ख घ च ज झ ट -भोज्यानि ।

तपोगुणरतेत्यस्मै कर्मणोऽन्ते महेभ्यकाः ।
[1]द्विगुणां त्रिगुणां वृत्तिं ददिरे वसनानि च ॥ ८३ ॥
जाता सकिञ्चना किञ्चिदन्येद्युर्निजवेश्मनः ।
कुड्यैकदेशात् पतितात् साऽवाप धनसञ्चयम् ॥ ८४ ॥
उद्यापनं च तपसः प्रारेभे कर्तुमन्यदा ।
पूजां जिनेन्द्रबिम्बानां विधिनाऽ[2]कारयत् ततः ॥ ८५ ॥
साधर्मिकगणे भक्त्या भोजितेऽस्या गृहाङ्गणे ।
मासोपवासी सत्साधुः सुव्रतः समुपाययौ ॥ ८६ ॥
परप्रमोदपूर्णाङ्ग्या तयाऽसौ प्रतिलाभितः ।
प्राशुकैर्भक्तपानाद्यैर्भावसारं च वन्दितः ॥ ८७ ॥
धर्मं [3]दृष्टप्रभावा सा पप्रच्छाथ तदन्तिके ।
सोऽवदत् साम्प्रतं धर्मदेशना न हि साम्प्रतम् ॥ ८८ ॥
यदि ते धर्मशुश्रूषा ततः काल उपाश्रये ।
आगत्य विधिना भद्रे ! श्रव्यो धर्मः सविस्तरः ॥ ८९ ॥
इत्युक्ता स्वाऽऽश्रयं गत्वा रागादिरहितोऽथ सः ।
विधिना पारणं चक्रे स्वाध्यायं च ततः क्षणम् ॥ ९० ॥
पुरलोकस्तदा तत्र श्रीदत्ता च समाययौ ।
प्रणम्य मुनिवर्यं तं तत्पुरो निषसाद च ॥ ९१ ॥

---

(१) ख ग घ च ज झ द्विगुणप्राज्यभोज्यानि ।
(२) ख घ च ज झ कामितप्रदाम् ।
(३) ख ग घ झ दृष्टफलं दृष्टा । च ज दृष्ट्वा फलं दृष्टा सा पप्रच्छ ।

धर्मलाभाऽऽशिषं दत्त्वा स मुनिर्धर्मदेशनाम् ।
विदधे प्रतिबोधार्थं श्रीदत्ताया जनस्य च ॥ ९२ ॥

तद्यथा—

धर्मादर्थस्तथा कामो धर्मान्मोक्षोऽपि जायते ।
चतुर्वर्गे ततस्तस्य मुख्यता परिकीर्तिता ॥ ९३ ॥
अयमर्थोऽपरोऽनर्थ इति निश्चयशालिना ।
भावनीया अस्थिमज्जा धर्मेणैव विवेकिना ॥ ९४ ॥
श्रीदत्ता स्माह भगवन्नस्थिमज्जाऽधिवासना ।
अमूर्तेन हि धर्मेण कथङ्कारं विधीयते ॥ ९५ ॥
ततोऽसौ सुव्रतः साधुस्तस्याः पौरजनस्य च ।
दृष्टान्तं कथयामासेप्सितार्थस्य निवेदकम् ॥ ९६ ॥
आसीदुज्जयिनीपुर्य्यां जितशत्रुर्महीपतिः ।
तत्प्रिया धारिणी नाम्नी नरसिंहश्च तत्सुतः ॥ ९७ ॥
कलाकलापसम्पूर्णः सोऽथ संप्राप्तयौवनः ।
रम्या द्वात्रिंशतं कन्यास्तातेन परिणायितः ॥ ९८ ॥
शरत्कालेऽन्यदा तत्र पुरेऽरण्यात् समाययौ ।
करी कश्चित् मदोन्मत्तः शङ्खश्वेतो नगोन्नतः ॥ ९९ ॥
कृतान्तमिव तं क्रुद्धं जनविप्लवकारिणम् ।
करिणं कथयामास पुमान् कोऽपि महीपतेः ॥ १०० ॥
तेनाथ प्रेषितं सैन्यं दैन्यं भेजे पुरोऽस्य तत् ।
स्वयमेव महीपालश्चचाल सबलस्ततः ॥ १ ॥

नरसिंहकुमारोऽथ विनिवार्य्य महीपतिम् ।
दमनार्थमिभस्यास्य प्राचलत्सेनया सह ॥ २ ॥
दीर्घो नव करान् समोन्नतश्च त्रींश्च विस्तृतः ।
दीर्घदन्तकरमुच्छ्रपुच्छो मधुपिङ्गदृक् ॥ ३ ॥
चत्वारिंशत्समधिकैर्लक्षणानां चतुःशतैः ।
अलङ्कृतः करीन्द्रोऽयं कुमारेण निरीक्षितः ॥ ४ ॥ (युग्मम्)
अभियानापसरणप्रपातोत्पतनादिभिः ।
बहुधा खेदयित्वा तं वशमानयति स्म सः ॥ ५ ॥
तस्मिन्नैरावणाकारेऽधिरूढं मेनिरे जनाः ।
कुमारमद्भुतश्रीकं साक्षादिव शचीपतिम् ॥ ६ ॥
तं गजेन्द्रमथालाने नीत्वा कलयति स्म सः ।
समुत्तीर्य्य ततस्तस्य स्वयं नीराजनां व्यधात् ॥ ७ ॥
जनकस्य समीपेऽथ स ययौ विनयाञ्चितः ।
विदधे जनकोऽप्यस्य परिरम्भादिगौरवम् ॥ ८ ॥
दध्यौ च जगतीभारक्षमोऽयमभवत् सुतः ।
तदेनं भूपतिं कृत्वा युज्यते मेऽनगारता ॥ ९ ॥
ततस्तं मन्त्रिसामन्तपौरलोकस्य संमतम् ।
स्वपदे स्थापयामास सुमुहूर्ते महीपतिः ॥ १० ॥
जयन्धरगुरोः पार्श्वे सोऽथ दीक्षामुपाददे ।
न्यायेन पालयामास नरसिंहनृपः [1]क्षमाम् ॥ ११ ॥

---

(१) ख ध च ज झ क्षितिम् ।

अन्येद्युर्दस्युनैकेनातिप्रचण्डेन मायिना ।
अगृह्येणालक्षितेन मुष्यते स्म पुरी सका ॥ १२ ॥
महाजनेन विज्ञप्ते तस्मिन्नर्थे महीभुजा ।
आरक्षकः समादिष्टश्चौरनिग्रहहेतवे ॥ १३ ॥
पुनर्विज्ञापयामासान्येद्युर्भूपं महाजनः ।
मुषिता निखिला देव ! तस्करेण पुरी तव ॥ १४ ॥
सुरूपा यौवनस्था च या काचि[1]दबलाऽभवत् ।
साऽपि रात्रौ तस्करेण नीयते स्म बलादपि ॥ १५ ॥
वासस्थानं ततोऽस्माकं किञ्चिदन्यत् प्रदर्श्यतां ।
निवसामो वयं तत्र नृनाथ ! निरुपद्रवाः ॥ १६ ॥
ततश्चारक्षको राज्ञा क्रुद्धेनैवं प्रजल्पितः ।
रे त्वं गृह्णन् ! विना रक्षामधमर्णोऽसि [2]किं मम ? ॥ १७ ॥
महाजनेन भणितं दोषो नास्यस्य कश्चन ।
अमुना सबलेनापि चौरो धर्तुं न शक्यते ॥ १८ ॥
तथा मया विधातव्यं यथा भव्यं भविष्यति ।
इत्युदित्वा नरेन्द्रेण विसृष्टोऽथ महाजनः ॥ १९ ॥
वरुढवेषो नृपो रात्रौ निर्गत्य निजमन्दिरात् ।
शङ्कास्थानेषु बभ्राम कुर्वंश्चौरगवेषणम् ॥ २० ॥
रात्रौ भ्रान्तः पुरीमध्ये बहिष्युर्या दिवा पुनः ।
तथाऽपि क्वापि नो दृष्टः स दुष्टस्तस्करोऽमुना ॥ २१ ॥

---

(१) ख घ च ज झ -दबला भवेत् ।
(२) च ज ठ किञ्चन ।

सायं मार्गरजःकीर्णस्तरुमूलस्थितो नृपः ।
कषायवस्त्रमायान्तं ददर्शैकं [1]त्रिदण्डिकम् ॥ २२ ॥
स्वसमीपे समायान्तं ननाम स महीपतिः ।
कुतः स्थानादागतोऽसीत्याऽऽललाप स कोऽपि तम् ॥ २३ ॥
राजा प्रोवाच द्रव्यार्थी पथिको भगवन्नहम् ।
भ्रान्तोऽस्मि बहुदेशेषु विभवं क्वापि नाऽऽप्नुवम् ॥ २४ ॥
तदा त्रिदण्डिकस्तूचे ये देशा वीक्षितास्त्वया ।
तेषां स्वरूपमाख्याहि नामग्राहमहो मम ॥ २५ ॥
भूपतिः स्माऽऽह चतुरशीतिसङ्ख्या हि नीवृतः ।
स्वरूपमपि केषाञ्चिच्छृणु त्वं कथयाम्यहम् ॥ २६ ॥
यत्रैकवसना नार्यः प्रायो लोकः प्रियंवदः ।
केशो नैवोच्यते बालो लाटदेशः स वीक्षितः ॥ २७ ॥
सुदीर्घचिबुरा मञ्जु[2]रावाः कम्बलचीवराः ।
यत्र रामाः स [3]सौराष्ट्रनामा राष्ट्रो मयेक्षितः ॥ २८ ॥
नालिकेरीकदलीनां फलं शालिश्च भोजने ।
नागवल्लीदलं यत्र स दृष्टः कुङ्कुणो मया ॥ २९ ॥
शुचिवेषाः प्रियाऽऽलापा यत्र लोका विवेकिनः ।
वैदग्धीरुचिरो देशो मया दृष्टः स गूर्जरः ॥ ३० ॥
यत्रैकभक्तिकं [4]वस्त्रमस्त्रं सर्वनृणां करे ।
भाषाऽतिपरुषा दृष्टः स देशो मारुकाऽऽह्वयः ॥ ३१ ॥

---

(१) ङ ठ त्रिदण्डिनम् । (३) घ च सौराष्ट्रो नाम ।
(२) ङ -रवाः । (४) ख घ वस्त्रं शस्त्रं ।

यवेक्षवो व्रीहयश्च जायते च क्षितित्रयम् ।
सर्वसाधारणो लोको मध्यदेशः स वीक्षितः ॥ ३२ ॥
गोधूमाः प्रचुरा यत्र दुष्प्रापं लवणं तथा ।
सजलः सकलोऽप्येष मालवोऽपि निरीक्षितः ॥ ३३ ॥
त्रिदण्डिवेषभृच्चौरः स श्रुत्वैवं व्यचिन्तयत् ।
अयं हि पथिकोऽवश्यं द्रव्यार्थी सदृशो मम ॥ ३४ ॥
बभाषे च मम त्वं चेद् भणितं भोः ! करिष्यसि ।
तन्मनोवाञ्छितं द्रव्यमचिरात् समवाप्स्यसि ॥ ३५ ॥
नृपः [1]प्रोवाच यो द्रव्यं ददाति हृदयेप्सितम् ।
न केवलमहं तस्य सर्वोऽप्याज्ञाकरो जनः ॥ ३६ ॥
सोऽवदत् सांप्रतं तर्हि वर्तते भोः ! तमस्विनी ।
पारदारिकदस्यूनां दुष्टानां च प्रियङ्करी ॥ ३७ ॥
तदुत्तिष्ठ कृपाणं त्वं करे कुरु, यथा पुरे ।
प्रविश्याऽऽनीयते द्रव्यं कुतोऽपीश्वरमन्दिरात् ॥ ३८ ॥
राजाऽपि चिन्तयामास नूनमेष स तस्करः ।
तदेनं हन्मि वा पश्याम्यथो यद्विदधात्य[2]सौ ॥ ३९ ॥
ततः खड्गं चकर्षासौ दध्यौ [3]संवीक्ष्य योग्यपि ।
दृष्टशेनैव खड्गेन नगरीशो विभाव्यते ॥ ४० ॥

---

(१) घ च ज ट प्रोचे च ।
(२) च -लम् ।
(३) ख घ च ज ठ तं वीक्ष्य ।

तन्मया मारणीयोऽयमुपायेन हि केनचित् ।
इति ध्यात्वाऽग्रतो गत्वा वलितोऽसौ झटित्यपि ॥ ४१ ॥
जागर्त्यापि पूर्लीको विश्रामं कुर्वहे ततः ।
क्षणमेकमिहाऽऽवां भोरित्यूचे च नृपं प्रति ॥ ४२ ॥
ततस्तदाऽऽज्ञया राजा चक्रे पल्लवसंस्तरौ ।
तत्रैकत्र स विश्रान्तो द्वितीये पार्थिवः स्वयम् ॥ ४३ ॥
मयि जाग्रति नैषोऽपि शयिष्यते कथञ्चन ।
चिन्तयित्वेति सुष्वाप संस्तरे सोऽथ तस्करः ॥ ४४ ॥
झटित्यधो समुत्थाय स्वस्थानेऽस्थापयन्नृपः ।
महत्काष्ठं, स्वयं चास्थात् सासिर्वृक्षस्य कोटरे ॥ ४५ ॥
चिदण्डो खड्गमाकृष्य तस्करोऽपि समुत्थितः ।
तत्काष्ठमभिघातेन नृपभ्रान्त्या द्विधा व्यधात् ॥ ४६ ॥
अपसार्य पटीं स्वर्गादिना विज्ञाय दारु तत् ।
धूर्तेन वञ्चितोऽस्मीति पश्चात्तापं चकार च ॥ ४७ ॥
राज्ञा सोऽभाणि रे दुष्ट ! मया त्वं मार्यसेऽधुना ।
विद्यते पौरुषं चेत् ते ततो मेऽभिमुखो भव ॥ ४८ ॥
साधु साध्विति चौरोऽपि बलात् निस्त्रिंशपाणिकः ।
संग्रामाय समं राज्ञाऽभ्यढौकिष्ट स दुष्टधीः ॥ ४९ ॥
खड्गाखड्गि चिरं कृत्वा दोष्मता पृथिवीभुजा ।
मर्मप्रदेश आहत्य पातितोऽसौ महीतले ॥ ५० ॥
विधुरस्तेन घातेन तस्करः स्माह भूपतिम् ।
सोऽहं दस्युरहो वीर ! येनेयं मुषिता पुरी ॥ ५१ ॥

अहं तावन् मरिष्यामि शृणु त्वं मम भाषितम् ।
अस्ति देवकुलस्यास्य पृष्ठे पातालमन्दिरम् ॥ ५२ ॥
तत्रास्ति प्रचुरं द्रव्यं धनदेवी च मे स्वसा ।
अन्याश्च नायिकाः सन्ति नगर्या या मया हृताः ॥ ५३ ॥
अमुं [1]च खड्गमादाय गच्छ त्वं तत्र सत्वरम् ।
आकारयेः स्वसारं मे शिलाया विवरेण ताम् ॥ ५४ ॥
कथयेश्च मृतिं मेऽस्याः खड्गमेनं च दर्शयेः ।
ततोऽसौ [2]त्वत्प्रवेशाय द्वारमुद्घाटयिष्यति ॥ ५५ ॥
तत् सर्वं भवता ग्राह्यमथवा यद् यस्य तस्य तत् ।
अर्पयेस्वमिति प्रोच्य विपन्नः स मलिम्लुचः ॥ ५६ ॥
गत्वा तत्र नरेन्द्रोऽपि कृत्वा च तदुदीरितम् ।
पातालभवने तत्र प्रविष्टोऽथ ददर्श तत् ॥ ५७ ॥
विश्राम्यतु क्षणं तावत् पर्यङ्केऽत्र भवानिति ।
भणित्वा भूपतिं द्वारं पिदधे तस्करस्वसा ॥ ५८ ॥
दृष्ट्वाऽवलोकयन्तीं तां क्षत्रं क्षत्रं स्वसंमुखम् ।
साशङ्कः स्थापयामासोपधानं तत्र भूपतिः ॥ ५९ ॥
स्वयं तस्थौ च दीपस्य च्छायायां मतिमानथ ।
मुक्त्वा यन्त्रशिलां शय्यां बभञ्ज धनदेव्यसौ ॥ ६० ॥
ततः सा ददती ताला जजल्पैवमहो मया ।
भव्यं कृतं यतो भ्रातृवधको विनिपातितः ॥ ६१ ॥

---

(१) ग घ च ठ मत्खड्ग-।
(२) झ त्वदुवशा सद्यो ।

धृत्वा केशेषु तां राजा प्रोचे रण्डे ! भविष्यसि ।
त्वमेवं कुर्वती हन्त भ्रातुर्मार्गानुयायिनी ॥ ६२ ॥
जल्पन्ती दीनवाक्यानि ततोऽसौ प्रविमुच्य ताम् ।
द्वारमुद्घाट्य च क्षिप्रं निजं धाम समाययौ ॥ ६३ ॥
मेलयित्वा च पूर्लोकं वस्तु यद् यस्य तस्य तत् ।
[1]सर्वं समर्पयामास भवनं तद्भञ्जं च ॥ ६४ ॥
आनीताः स्वस्वगेहेषु ताः स्त्रियस्तेन दस्युना ।
मोहिता न रतिं तत्र लेभिरे चञ्चलाशयाः ॥ ६५ ॥
मुहुर्मुहुर्व्रजन्ति स्म दस्युस्थाने ततो जनैः ।
कथितं पार्थिवस्यैतत् तेनापि भणितो भिषक् ॥ ६६ ॥
सोऽवदद् दस्युचूर्णेन जाता एवं विधा इमाः ।
दत्त्वा स्वचूर्णं राजेन्द्र ! स्वभावस्थाः करोम्यहम् ॥ ६७ ॥
ततो राजाज्ञया तेन ताः कृता गतकार्मणाः ।
एका तु तदवस्थैवाऽऽचख्ये तदपि भूभुजा ॥ ६८ ॥
पृष्टोऽथ भिषगाचख्यौ देव ! चूर्णेन योगिनः ।
कासाञ्चित् वासिता कृत्तिः कासाञ्चित् मांसशोणिते ॥६९॥
सर्वास्ताः प्रतिचूर्णेन स्वभावस्थाः कृता मया ।
अस्यास्तु वासितास्तेनास्थिमज्जा अपि भूपते ! ॥ ७० ॥
यद्यसौ घर्षयित्वाऽस्य दस्योरस्थीनि पाय्यते ।
ततः संजायते राजन् ! स्वभावस्थाऽन्यथा न हि ॥ ७१ ॥

---

(१) घ च झ. स सर्वमर्पयामास ।

तत् तथा कारयित्वाऽऽशु निर्विकारा कृताऽप्यसौ ।
नरसिंहनरेन्द्रेण सदा परहितैषिणा ॥ ७२ ॥
स श्रीजयन्धराचार्योऽन्यदा तत्र समाययौ ।
यस्य पार्श्वे पिता राज्ञो जितशत्रुरभूद् व्रती ॥ ७३ ॥
धर्मं तदन्तिके श्रुत्वा नरसिंहनृपोऽपि सः ।
प्रतिबुद्धः सुतं राज्येऽस्थापयद् गुणसागरम् ॥ ७४ ॥
ततो दीक्षामुपादाय तपः कृत्वाऽतिदुष्करम् ।
निष्कर्मा नरसिंहर्षिरवाप शिवसम्पदम् ॥ ७५ ॥

॥ इति नरसिंहऋषिकथानकम् ॥

ऊचेऽथ[1] सुव्रतो भद्रे ! यथा चूर्णेन योगिनः ।
तस्यास्तस्या नितम्बिन्या अस्थि[2]मज्जाऽधिवासिता ॥ ७६ ॥
तथा त्वमपि कल्पद्रुचिन्तामण्यधिकश्रिया ।
धर्मेण भावयात्मानं श्रीदत्ते ! दृष्टप्रत्यये ! ॥ ७७ ॥
ततोऽसौ शुद्धसम्यक्त्वमूलं धर्ममगारिणाम् ।
प्रतिपेदे मुनेस्तस्य समीपे सरलाऽऽशया ॥ ७८ ॥
व्यहार्षीन्मुनिरन्यत्र श्रीदत्ताऽपि गता गृहम् ।
प्रतिपन्नं निजं धर्मं विधिवत् पर्यपालयत् ॥ ७९ ॥
चकार साऽन्यदा कर्मपरिणामवशादिमाम् ।
धर्मस्य विषये श्राद्धी विचिकित्सां मनोगताम् ॥ ८० ॥

---

(१) च झ, च ।
(२) च झ ट -मज्जा हि वासिताः ।

जैनं धर्ममसुं रम्यं यत्नतः प्रकरोम्यहम् ।
परमस्य फलं भावि न वेति ज्ञायते न हि ॥ ८१ ॥
विचिकित्सामिमां कृत्वा मृत्वा चायुःक्षये सका ।
मज्ज्ञाता यत्र तदितः स्थानं सङ्कीर्तयाम्यहम् ॥ ८२ ॥
विजयेऽत्रैव वैताढ्ये नगरे सुरमन्दिरे ।
राजा कनकपूज्योऽभूद् वायुवेगा च तत्प्रिया ॥ ८३ ॥
तस्य कीर्तिमतो राज्ञः पुत्रः कीर्तिधरोऽस्म्यहम् ।
ममाप्यनिलवेगाख्या बभूव सहचारिणी ॥ ८४ ॥
गजकुम्भबलीवर्दस्वप्नत्रितयसूचितः ।
प्रतिविष्णुर्नृपो जज्ञे दमितारिर्ममाऽऽत्मजः ॥ ८५ ॥
उद्यौवनो मया वह्नीः स कन्याः परिणायितः ।
स्थापितश्च निजे राज्ये मया चाऽऽत्ताऽनगारता ॥ ८६ ॥
दमितारेर्नृपस्यास्य मदिरा नाम वल्लभा ।
तत्कुक्षिसम्भवा पुत्री कनकश्रीर्भवत्यभूत् ॥ ८७ ॥
यत् त्वया विहिता धर्मविचिकित्सा पुरा भवे ।
तत् ते बन्धुवियोगादि भद्रे ! दुःखमभूदिदम् ॥ ८८ ॥
निजं पूर्वभवं श्रुत्वा पितामहमुनेर्मुखात् ।
जातसंसारवैराग्या दमितारिनृपात्मजा ॥ ८९ ॥
ऊचेऽपराजितानन्तवीर्यावेवं कृताञ्जलिः ।
चेद् युवामनुजानीथ[1]स्तदद्य प्रव्रजाम्यहम् ॥ ९० ॥

---

(१) ख घ च ज झ -स्तदाऽऽर्यौ ।

ताभ्यां सा भणिता चैवं [1]संप्राप्य सुभगापुरीम् ।
स्वयंप्रभजिनोपान्ते भूयास्त्वं व्रतिनी शुभे ! ॥ ९१ ॥
तं तपोधनमानम्य विमानमधिरुह्य च ।
तौ तया सहितौ शीघ्रं संप्राप्तौ नगरीं निजाम् ॥ ९२ ॥
स्वयंप्रभजिनोऽन्येद्युः सुरासुरनरार्चितः ।
आगत्य समवासार्षीत् सुभगायां पुरि प्रभुः ॥ ९३ ॥
गत्वा भक्त्या ववन्दाते तमिमौ बलकेशवौ ।
धर्मं शुश्रुवतुः सार्द्धं तया च कनकश्रिया ॥ ९४ ॥
अग्रेऽपि कनकश्रीः सा विषयेभ्यो विरक्तधीः ।
जैनीं वाचं समाकर्ण्य विशेषेणाभवत् तदा ॥ ९५ ॥
ततश्च हरिसीरिभ्यां कृतनिष्क्रमणोत्सवा ।
सा प्रवव्राज तेपे चैकावल्यादि तपो महत् ॥ ९६ ॥
शुक्लध्यानानलप्लुष्टघातिकर्मचतुष्टया ।
उत्पाद्य केवलज्ञानं संप्राप्ता परमं पदम् ॥ ९७ ॥
इतोऽपराजितस्याऽऽसीद् विरता नाम गेहिनी ।
तदङ्गसंभवा पुत्री [2]जाता सुमतिसंज्ञिका ॥ ९८ ॥
जीवाजीवाऽऽदितत्त्वज्ञा तपःकर्मसमुद्यता ।
आबाल्यादपि सा जज्ञे कुशला जिनशासने ॥ ९९ ॥
चतुर्थपारणेऽन्येद्युस्तस्या गेहे समाययौ ।
शान्तो दान्तः क्षमायुक्तो वरदत्तो महामुनिः ॥ ७०० ॥

---

(१) ख घ च संभाव्य ।
(२) घ च ज झ जज्ञे ।

[1]परिवेषितया स्थाले स्वस्य पारणहेतवे ।
प्रत्यलाभि तया साधू रभवत्या मनोज्ञया ॥ १ ॥
मुनेः प्रभावतस्तस्य तत्र तद्भक्तिरञ्जितैः ।
विहितानि सुरैरासन् पञ्च दिव्यानि तत्क्षणात् ॥ २ ॥
स स्वस्थानमगात् साधुस्तद् दृष्ट्वा बलकेशवौ ।
चिन्तयामासतुः कन्या धन्येयं कृतपुण्यका ॥ ३ ॥
आलोच्य मन्त्रिणा सार्द्धं महानन्देन तौ ततः ।
कारयामासतुश्चास्याः कृते रम्यं स्वयंवरम् ॥ ४ ॥
एत्य दूतसमाहूताः सर्वेऽपि पृथिवीभुजः ।
आसीना आसनेषूच्चैः स्वयंवरणमण्डपे ॥ ५ ॥
कन्याऽपि कृतशृङ्गारा सखीवृन्दसमन्विता ।
वरमालाऽङ्कितकरा यावत् तत्र समागता ॥ ६ ॥
तावद् देवतया पूर्वभवस्वस्रा प्रबोधिता ।
कृतसङ्केतया तत्राऽऽगतया व्रतहेतवे ॥ ७ ॥
अनुज्ञाप्य नृपान् सर्वान् स्वयम्वरसमागतान् ।
मुरारिबलभद्राभ्यामनुज्ञाता विशेषतः ॥ ८ ॥
[2]पञ्चकन्यागतैः सार्द्धं प्रतिपद्यानगारताम् ।
समीपे सुव्रताऽऽर्यायाः सा [3]चचार तपोऽमलम् ॥९॥ (युग्मम्)
क्षपकश्रेणिमारूढा क्रमात् संप्राप्तकेवला ।
प्रतिबोधितभव्यौघा ययौ साऽपि शिवं सती ॥ १० ॥

---

(१) ग परिवेष्य-। (३) ञ चकार।
(२) ख घ झ ड. कन्या पञ्चगतैः।

अशीतिपूर्वलक्षाणि चतुर्भिरधिकान्यथ ।
आयुः प्रपूर्य्य सोऽनन्तवीर्यो विष्णुर्व्यपद्यत ॥ ११ ॥
संवत्सरद्विचत्वारिंशल्लक्षसहस्रायुरादिमे ।
खभ्रे नारकिको जज्ञे [1]स निकाचितकर्मभिः ॥ १२ ॥
तद्वियोगेऽपरः शोकमस्तोकं विदधे ततः ।
नीतिधर्मविदग्धेन मन्त्रिणैवमभाणि सः ॥ १३ ॥
यदि मोहपिशाचेन च्छल्यन्ते त्वादृशा अपि ।
[2]तदा किमपरं धीर ! धीरता संश्रयत्वियम् ॥ १४ ॥
इति तद्वचसा किञ्चिद् गतशोको बभूव सः ।
अन्यदा गणभृत् तत्राऽऽययौ नाम्ना यशोधरः ॥ १५ ॥
विज्ञायाऽऽगमनं तस्य वन्दनार्थमगादसौ ।
भक्त्या षोडशभिर्भूपसहस्रैः परिवारितः ॥ १६ ॥
नत्वा गणधरेन्द्रं तं निषण्णोऽसौ यथास्थिति ।
कृताञ्जलिपुटो धर्मदेशनामशृणोदिति ॥ १७ ॥
शोकोऽभीष्टवियोगेन जायते दारुणो जने ।
स सद्भिः परिहर्तव्यस्तत्स्वरूपमिदं यतः ॥ १८ ॥
नामान्तरः पिशाचोऽयं पापो रूपान्तरस्तथा ।
तारुण्यं तमसो ह्येष [3]विषस्यैष विशेषतः ॥ १९ ॥

---

(१) क ण द खनिका- । ङ ऽसौ ।
(२) ङ तदा कमपरं विश्वे धीरा यं संश्रयन्ति हि ।
(३) च ज विषयस्य ।

तस्मादिष्टवियोगाऽऽख्यमहद्रोगनिपीडितैः ।
सुयुतोक्तक्रियायुक्तैः कार्यं धर्मौषधं महत् ॥ २० ॥

[1]सम्पदोऽत्र करिकर्णचञ्चलाः
सङ्गमाः प्रियवियोगनिष्फलाः ।
जीवितं मरणदुःखनीरसं
मोक्षमक्षयमतोऽर्जयेद् बुधः ॥ २१ ॥

तां धर्मदेशनां श्रुत्वा गतशोकोऽपराजितः ।
जातव्रतपरीणामो नत्वा तं गणनायकम् ॥ २२ ॥
गृहमागत्य राज्ये च स्थापयित्वा स्वनन्दनम् ।
समाददे परिव्रज्यां नृपमण्डलसंयुतः ॥ २३ ॥ (युग्मम्)
बहुकालं तपस्तप्त्वा कृत्वाऽन्तेऽनशनं तथा ।
विपद्याच्युतकल्पेऽसौ संजज्ञे त्रिदशेश्वरः ॥ २४ ॥
इतोऽस्य जम्बूद्वीपस्य क्षेत्रे भरतनामनि ।
वैताढ्यदक्षिणश्रेण्यां पुरे गगनवल्लभे ॥ २५ ॥
मेघवाहनविद्याभृद्भूपतेर्मेघमालिनी ।
बभूव गुणसंयुक्ता गेहिनी रूपशालिनी ॥ २६ ॥ (युग्मम्)
अनन्तवीर्यो नरकादुद्धृत्य समभूत् तयोः ।
मेघनादाभिधः पुत्रो यौवनं समवाप सः ॥ २७ ॥
कन्या विवाह्य बह्वीस्तं स्वराज्ये विनिवेश्य च ।
प्रतिपेदेऽनगारत्वं मेघवाहनभूपतिः ॥ २८ ॥

---

(१) अयं श्लोकः ग ङ च ठ ढ पुस्तकेष्वेव दृश्यते ।

सोऽथ श्रेणिद्वयस्वामी मेघनादो [1]महामतिः ।
दशोत्तरशतं देशान् स्वसुतेभ्यो ददौ क्रमात् ॥ २९ ॥
गत्वा सुराचलेऽन्येद्युः प्रतिमाः शाश्वतार्हताम् ।
पूजयामास विद्यां च प्रज्ञप्तिं भक्तिपूर्वकम् ॥ ३० ॥
तदा तत्राऽऽययुः सर्वदेवाः कल्पनिवासिनः ।
अच्युतेन्द्रेण दृष्टोऽसौ स्नेहात् सम्भाषितस्तथा ॥ ३१ ॥
स आख्याय पूर्वभवस्वरूपं धर्मसंयुतम् ।
[2]निजं स्थानं ययौ मेघनादोऽपि खचरेश्वरः ॥ ३२ ॥
भक्त्याऽमरगुरोः पार्श्वे सुनीन्द्रस्यानगारताम् ।
प्रतिपद्य तपस्तेपे गत्वा नन्दनपर्वते ॥ ३३ ॥
अश्वग्रीवसुतजीवासुरेणास्य विनिर्मिताः ।
महोपसर्गास्त्रैकरात्रिकीप्रतिमाजुषः ॥ ३४ ॥
प्रतिमां पारयित्वा तां विहृत्य जगतीतले ।
मृत्वा समाधिना चान्ते सोऽप्यभूदच्युतेश्वरः ॥ ३५ ॥

षष्ठो भवः सप्तमसंयुतोऽयं
कषायविच्छेदकथाविचित्रः ।
प्रोक्तो मया शान्तिजिनेश्वरस्य
करोतु कल्याणततिं [3]स सद्भे ॥ ७३६ ॥

इत्याचार्यश्रीअजितप्रभसूरिविरचिते श्रीशान्तिनाथचरिते षष्ठसप्तमभववर्णनो नाम तृतीयः प्रस्तावः ॥ ३ ॥

---

(१) ख घ च ज महीपतिः । (३) ङ च ।
(२) घ च ज झ ययौ स्थानं निजं ।

चतुर्थः प्रस्तावः ।

इतः पूर्वविदेहेऽत्र जम्बूद्वीपस्य मध्यगे ।
विजये मङ्गलावत्यभिधे सीतानदीतटे ॥ १ ॥
तीर्थङ्करादिपुंरत्नमन्वया रत्नमन्वया ।
अस्ति सिद्धान्तविख्याता शाश्वता नगरी वरा ॥२॥ (युग्मम्)
दुर्नीतिवारकत्वेन प्रजायाः क्षेमकारकः ।
तत्र क्षेमङ्करो जज्ञे राजा तीर्थङ्करश्च सः ॥ ३ ॥
सतीत्वपादपाऽऽवाला सुविशाला गुणश्रिया ।
बभूव भूपतेस्तस्य रत्नमालाऽभिधा प्रिया ॥ ४ ॥
अपराजितजीवोऽसौ द्वाविंश[1]त्यर्णवस्थितेः ।
अच्युतेन्द्रपदाच्चुत्वा तस्याः कुक्षाववातरत् ॥ ५ ॥
चतुर्दश महास्वप्ना वज्रस्वप्नसमन्विताः ॥
[2]दृष्टा देव्या तया रात्रौ चक्रभृज्जन्मसूचकाः ॥ ६ ॥
कथितास्ते महीभर्तुः प्रभातोत्थितया तया ।
[3]सुपुत्रजन्मकथनात् तेनाप्याऽऽह्लादिता मुदा ॥ ७ ॥

---

(१) ग ज ट ण, -त्यतरस्थितेः ।
(२) ज द दृष्टा ।
(३) ज सुपुत्रकथनात्तेन राज्ञाऽप्याह्लादिता मुदा । घ ठ -मुदाः ।

अजीजनत् सुतं राज्ञी सम्पूर्णसमयेऽथ सा ।
प्रवर्द्धितश्च भूपालश्चेटीभिः सुतजन्मना ॥ ८ ॥
आसन्नकुलवृत्त्या ताः सुतजन्मनिवेदिकाः ।
तोषयित्वा महीपालो वर्द्धापनमकारयत् ॥ ९ ॥
दृष्टं पञ्चदशस्वप्ने देव्या वज्रायुधं ततः ।
वज्रायुधाभिधानं तत्पित्रा पुत्रस्य निर्ममे ॥ १० ॥
अष्टवर्षप्रमाणोऽसौ कलाचार्यस्य सन्निधौ ।
कारितस्तु[1] कलाभ्यासमावासं गुणसंपदः ॥ ११ ॥
संप्राप्तयौवनो राजकन्यां लक्ष्मीवतीं वराम् ।
सोऽथोत्सवेन गुरुणा गुरुणा परिणायितः ॥ १२ ॥
अनन्तवीर्यजीवोऽथ प्रच्युत्याच्युतकल्पतः ।
वज्रायुधकुमारस्य लक्ष्मीवत्याः[2] सुतोऽभवत् ॥ १३ ॥
सहस्रायुधनामाऽसावपि संप्राप्तयौवनः ।
उपयेमे नृपसुतां सुरूपां कनकश्रियम् ॥ १४ ॥
भुञ्जानस्य तया सार्द्धं भोगांस्तस्याऽपि[3] बन्धुरान् ।
कालक्रमेण संजज्ञे पुत्रः शतबलाभिधः ॥ १५ ॥
क्षेमङ्करनृपोऽन्येद्युः [4]पुत्रपौत्रसमन्वितः ।
सिंहासनोपविष्टोऽसौ यावदासीत् सभान्तरे ॥ १६ ॥

---

(१) ख घ च ङ -तः स कलाभ्यास- ।
(२) ग ज झ ठ ड लक्ष्मीवत्यां ।
(३) ङ ऽति- ।
(४) ङ ङ्क पुत्रपौत्रप्रपौत्रयुक् । ट पुत्रपौत्रप्रपौत्रकः ।

तत्रागात्तावदीशानकल्पवास्यमृतागनः ।
चित्रचूलोऽभिधानेन कश्चिद् मिथ्यात्वमोहितः ॥१७॥(युग्मम्)
नास्ति देवो गुरुर्नास्ति नास्ति पुण्यं न पातकम् ।
न जीवपरलोकौ चेत्यादिनास्तिकवाद्यसौ ॥ १८ ॥
वज्रायुधकुमारेण भणितो भोः ! न युज्यते ।
तव नास्तिकवादोऽयमत्र हेतुर्भवानपि ॥ १९ ॥
चेत् त्वया सुकृतं किञ्चित् नाभविष्यत् पुरा कृतम् ।
नालप्स्याथाः सुरत्वं हि ततस्त्वं गर्भणः पदम् ॥ २० ॥
आसीस्त्वं मनुजः पूर्वमिह जातोऽसि निर्जरः ।
घटते कथमप्येतद् यदि जीवो न विद्यते ॥ २१ ॥
इत्यादिहेतुभिः सोऽथ निर्जरः प्रतिबोधितः ।
वज्रायुधकुमारेण ततस्तुष्टो जगाद सः ॥ २२ ॥
भोः ! कुमार ! त्वया साधु विदधे यद्भवार्णवे ।
पतन् मज्ज्ञानहस्तावलम्बनेनोद्धृतोऽस्म्यहम् ॥ २३ ॥
आददे सोऽथ सम्यक्त्वं कुमारस्यैव सन्निधौ ।
प्रियं किं ते करोमीति कुमारं तं जजल्प च ॥ २४ ॥
निःस्पृहाय ततस्तस्मै दत्त्वाऽऽभरणमुत्तमम् ।
स देवः प्रययौ स्वर्गमीशानेन्द्रस्य सन्निधौ ॥ २५ ॥
वज्रायुधकुमारोऽसावीशानेन्द्रेण पूजितः ।
अयं जिनेन्द्रो भावीति भक्तिरञ्जितचेतसा ॥ २६ ॥
वसन्तसमयेऽन्येद्युः कुमारं तं स्मरोपमम् ।
भद्रा सुदर्शना पुष्पाण्यर्पयित्वा व्यजिज्ञपत् ॥ २७ ॥

देव ! लक्ष्मीवतो देवी युष्माभिः सह वाञ्छति ।
कर्तुं सूरनिपाताख्योद्याने सुरभिखेलनम् ॥ २८ ॥
वज्रायुधकुमारोऽथ सप्तराज्ञीशताग्रया ।
लक्ष्मीवत्या समं देव्या तदुद्यानमगाद्वरम् ॥ २९ ॥
तत्र नानाविधक्रीडाः कर्तुं प्रवृत्ते जनः ।
कुमारश्च ययौ वापीं सप्रियः प्रियदर्शनः ॥ ३० ॥
तत्र प्रविश्य पत्नीभिः सानुरागाभिरञ्चितः ।
निरासन्नीक्षतव्रीडां जलक्रीडां चकार सः ॥ ३१ ॥
दमितारिरथो जीवो भवं भ्रान्त्वा पुरा भवे ।
कृत्वा किञ्चिदनुष्ठानं विद्युद्दंष्ट्रः सुरोऽभवत् ॥ ३२ ॥
जलक्रीडापरं वीक्ष्य कुमारं पूर्वमत्सरात् ।
तद्वधार्थं महाशैलं वाप्या उपरि सोऽमुचत् ॥ ३३ ॥
अधस्तान्नागपाशैश्च तं बबन्ध दुराशयः ।
वज्रायुधोऽपि चक्रीति महाबलसमन्वितः ॥ ३४ ॥
अधिष्ठितश्च यक्षाणां सहस्रद्वितयेन सः ।
बिभेद तं नगं नागपाशान् त्रोटयति स्म च ॥३५॥ (युग्मम्)
ततो वाप्या विनिर्गत्य सर्वराज्ञीगणाऽऽवृतः ।
अक्षताङ्गः कुमारोऽसौ चिरं चिक्रीड कानने ॥ ३६ ॥
अत्रान्तरे सहस्राक्षो जिनं नत्वा विदेहतः ।
वलितः शाश्वतयात्राकृते नन्दीश्वरं प्रति ॥ ३७ ॥
वापीमध्यान्नगं भित्त्वा क्षित्त्वा पाशांश्च सप्रियम् ।
निर्गच्छन्तं कुमारं तं पश्यति स्म सविस्मयः ॥ ३८ ॥

ज्ञात्वा ज्ञानोपयोगेन भाविनं तं च तीर्थपम् ।
ननाम परया भक्त्या तुष्टुवे च कृताञ्जलिः ॥ ३९ ॥
धन्योऽसि त्वं कुमारेन्द्र ! यो भविष्यसि भारते ।
षोडशः तीर्थकृत् शान्तिनामा शान्तिकरो जने ॥ ४० ॥
इति स्तुत्वा सुनाभीरः प्रययौ स्वानमीप्सितम् ।
कुमारोऽपि गृहं प्राप्तः क्रीडित्वोपवने चिरम् ॥ ४१ ॥
सोऽपि चेमङ्करक्ष्मापोऽभ्येत्य लोकान्तिकामरैः ।
तीर्थं प्रवर्तयेत्युक्तैर्बोधितः स्थितिवेदिभिः ॥ ४२ ॥
ततो वज्रायुधं राज्ये निवेश्य जगतीप्रियम् ।
दत्त्वा च वार्षिकं दानं स चारित्रमुपाददे ॥ ४३ ॥
विहृत्य जिनलिङ्गेन किञ्चित् कालं विकेवलः ।
अवाप केवलज्ञानं घातिकर्मक्षये ततः ॥ ४४ ॥
देवैरागत्य समवसरणे रचिते सति ।
तत्रोपविश्य विधिना चक्रेऽसौ धर्मदेशनाम् ॥ ४५ ॥
कल्पद्रुमचिन्तामणिकामधेन्वधिकप्रभः ।
कर्तव्यः सर्वदा धर्मो भो भव्याः ! प्रतियत्नतः ॥ ४६ ॥
किन्तु सम्यक् परीक्ष्योऽयं श्रुतशीलकृपादिभिः ।
आयुर्वेदविनिर्दिष्टक्षीरपाणवचो यथा ॥ ४७ ॥
अविचार्य प्रवृत्तः सन् क्षीरमर्कादिसम्भवम् ।
पिबेद् [1]येनान्त्रशूलादिदोषः संजायते महान् ॥ ४८ ॥

---

(१) क ख पिबेद् यो नाऽत्र पित्तादि-।

बुद्ध्या विचारयेद् यस्तु वैद्यवाक्यं, पिबत्यसौ ।
बलपुष्टिकरं क्षीरं गवादीनां मनोहरम् ॥ ४८ ॥
धर्मे प्रवृत्तिः कर्तव्येति वाक्येऽप्यविचारिते ।
करोत्यज्ञानतो जीवः प्रवृत्तिं धनुरादिषु ॥ ५० ॥
धर्मे तस्मादहिंसादिलक्षणे जिनभाषिते ।
विदधीत प्रवृत्तिं भोः ! शिवं सौख्यं यदीच्छथ ॥ ५१ ॥
अविचार्य धिया कार्यं कुर्वतामिह देहिनाम् ।
[1]दोषा भवन्त्यमृतास्रनिपात्यादिनरेन्द्रवत् ॥ ५२ ॥
पप्रच्छैवमथो सर्वा पर्षत् कौतूहलाकुला ।
अमृतास्रनिपात्यादिनृपाः के भगवन्निमे ॥ ५३ ॥
दोषो जज्ञे कथं तेषामविचारितकर्मणाम् ।
इति सर्वसदःप्रोक्तः क्षेमङ्करजिनोऽवदत् ॥ ५४ ॥
अस्त्यवन्तिजनपदे प्रसिद्धोज्जयिनी पुरी ।
नगरी धनदस्येवावतीर्णेह कुतूहलात् ॥ ५५ ॥
जितशत्रुर्महीपालः पालयामास तां पुरीम् ।
यो वैरिवारनारीणां वैधव्यव्रतदो गुरुः ॥ ५६ ॥
तस्याग्रमहिषी जज्ञे विजयश्रीः सुलोचना ।
भुञ्जानस्तामिलां चैव राजा राज्यमपालयत् ॥ ५७ ॥
आस्थानमण्डपाऽऽसीनमन्यदा तं महीपतिम् ।
सुविज्ञातेङ्गिताकारः प्रतीहारो व्यजिज्ञपत् ॥ ५८ ॥

---

(१) ख घ छ झ दोषो भवत्यमृ- ।

राजन् ! त्वन्मन्दिरद्वारि त्वद्दर्शनसमुत्सुकाः ।
चत्वारः पुरुषाः सन्ति मूर्त्या राजसुता इव ॥ ५८ ॥
ततः किं क्रियतां तेषामित्युक्ते स्माऽऽह भूपतिः ।
शीघ्रमानय तानत्रेत्यानिनाय च सोऽपि तान् ॥ ६० ॥
दत्ताऽऽसनोपविष्टांस्तान् निरीक्ष्य विहितानतीन् ।
दध्यौ राजाऽनयाऽऽकृत्या नूनमेते सुवंशजाः ॥ ६१ ॥
ताम्बूलादिप्रदानेन संमान्याभाषितास्ततः ।
कुतो यूयमिहाऽऽयाताः केनार्थेनेति भूभुजा ॥ ६२ ॥
अथोवाचानुजस्तेषामस्ति देवोत्तरापथे ।
सुवर्णतिलकं नाम विख्यातमवनौ पुरम् ॥ ६३ ॥
तद् वैरिमर्दनो राजा न्यायेन प्रत्यपालयत् ।
तस्य रूपवती नाम्ना चारुरूपवती प्रिया ॥ ६४ ॥
तयोः क्रमेण सञ्जाताश्चत्वारस्तनया वराः ।
तेषां नामानि चामूनि प्रदत्तानि क्रमेण हि ॥ ६५ ॥
प्रथमो देवराजाख्यो वत्सराजो द्वितीयकः ।
तृतीयो दुर्लभराजः कीर्त्तिराजश्चतुर्थकः ॥ ६६ ॥
सर्वे शुभकलाऽभ्यासं कारिता जनकेन ते ।
प्राप्याथ यौवनं स्वानुरूपकन्याविवाहिताः ॥ ६७ ॥
अन्येद्युः स महीपालो निवर्तकरुजाऽर्दितः ।
राज्ये संस्थापयामास देवराजं सुताग्रिमम् ॥ ६८ ॥
दत्त्वा शिक्षामथो तस्मै परलोकमियाय सः ।
स्वं राज्यं देवराजोऽपि कियत्कालमपालयत् ॥ ६९ ॥

दायादैरन्यदा तच्च संभूय बलवत्तरैः ।
प्रसह्य स्वीकृतं देशात् निरासे स च सानुजः ॥ ७० ॥
देवराजः स देवाऽयमाययौ युष्मदन्तिके ।
सेवाविधित्सयाऽस्माभिरनुजैः परिवारितः ॥ ७१ ॥
गुणदूतसमाहूता भवतामन्तिके वयम् ।
धृत्वा सद्भावनां चित्ते समायाता महीपते ! ॥ ७२ ॥
हृष्टो राजाऽवदद् यूयं मम पार्श्वे यदागताः ।
तत्साधु विहितं सन्तः सतां शरणमेव यत् ॥ ७३ ॥
प्रतीहारं समादिश्य राज्ञा वृत्तिसमन्वितः ।
निवासाय ततस्तेषामावासः प्रवरोऽर्पितः ॥ ७४ ॥
दृढभक्तिपराः प्रौढाः सेवकास्ते महीभुजा ।
प्रसादपूर्वकं स्वाङ्गरक्षकत्वे नियोजिताः ॥ ७५ ॥
रात्रेश्चतुर्षु यामेषु चत्वारोऽपि क्रमेण ते ।
चक्रिरे नृपते रक्षां श्रयितस्य धृताऽऽयुधाः ॥ ७६ ॥
ग्रीष्मकालेऽन्यदा देवराजोऽनुज्ञाप्य भूपतिम् ।
ग्रामे क्वापि समासन्ने ययौ कार्येण केनचित् ॥ ७७ ॥
कार्यं कृत्वा स मध्याह्ने वलितो यावदन्तरे ।
भीषणा तावदुत्तस्थौ प्रबला वातमण्डली ॥ ७८ ॥
धूलिरुच्छलति स्मोच्चैः प्रचण्डपवनोद्धता ।
निपेतुः कर्कराः पत्रतृणानि भ्रेमुरम्बरे ॥ ७९ ॥
पपात विरलं चाम्बु गुरुगर्जारवोल्कटम् ।
विललास तथा विद्युद् दृष्टिसन्तापकारिणी ॥ ८० ॥

तद्धूलिजलभीतोऽमावायित्य वटपादपम् ।
यावत् तस्थौ क्षणं तावदथोपोदुपरि स्वरम् ॥ ८१ ॥
किमेतदिति दत्तावधानो भाषाविशारदः ।
वचः पिशाचयोः सोऽथ शुश्रावेति सुदुःश्रवम् ॥ ८२ ॥

[1]फो फो ! जाणसि किंचो सो पभणदि णो कहेहि मह किं तं ।
जंपइ इमोवि अज्जं मलिहीए सो नलिन्दोत्ति ॥ ८३ ॥

[2]बोएण तओ *पुट्ठो केण निमित्तेण कीइ वेलाए ।
सो जंपइ सप्पाओ पढमे पहरंमि रत्तीए ॥ ८४ ॥
तत्पिशाचवचः श्रुत्वा पोडितो हृदयेऽधिकम् ।
स दध्यौ हा कथं कार्यं दैवेनैतद्विनिर्मितम् ॥ ८५ ॥
तथा कथञ्चिदत्रार्थे यतिष्येऽहं यथा विभोः ।
नैतद्भविष्यतीत्येवं ध्यायन् सोऽगाद् नृपान्तिकम् ॥ ८६ ॥
प्रदोषसमये जाते विसृज्याऽऽस्थानगं जनम् ।
प्रविश्य वासभवने सुप्तो देव्या समं नृपः ॥ ८७ ॥
देवराजोऽपि तद्वासगृहं सर्वत्र शङ्कितः ।
उपरिष्टादधस्ताच्च शोधयामास यत्नतः ॥ ८८ ॥

---

(१) भो भोः ! जानासि किञ्चित् स प्रभणति नो कथय मम किं तत् ।
कथयत्ययमपि अद्य मरिष्यति स नरेन्द्र इति ॥

(२) द्वितीयेन ततः पृष्टः केन निमित्तेन कस्यां वेलायाम् ।
स कथयति सर्पात् प्रथमे प्रहरे रात्रेः ॥

* इ पुणोवि ।

ततः खड्गं समाकृष्य दीपच्छायान्तरस्थितः ।
उपर्यधो वीक्ष्यमाणो यावदस्थादसौ तदा ॥ ८८ ॥
चन्द्रोदयस्य विवरेणाहिं दृष्ट्वा प्रलम्बितम् ।
अभीतो जगृहे शीघ्रं करेणैकेन तन्मुखम् ॥ ८० ॥ (युग्मम्)
द्विखण्डं विदधे चास्य देहमन्येन सोऽसिना ।
एकत्र गोपयामास तत् खण्डद्वयमप्यसौ ॥ ८१ ॥
दृष्ट्वाऽथ पतितान् रक्तबिन्दून् देव्या उरःस्थले ।
सोऽपजङ्के स्वहस्तेन विषसंक्रान्तिभीरुकः ॥ ८२ ॥
अत्रान्तरे पश्यति स्म जातनिद्राक्षयो नृपः ।
करं व्यापारयन्तं तं देव्या वक्षोरुहोपरि ॥ ८३ ॥
ततः कोपपरीताङ्गो दध्यौ किं मारयाम्यमुम् ।
अथवा सबलो नैष शक्यो मारयितुं मया ॥ ८४ ॥
अमुं केनाप्युपायेन मारयिष्यामि निश्चितम् ।
इति सञ्चिन्त्य तस्थौ स सनिद्राऽवस्थया [1]तया ॥ ८५ ॥
[2]वादितोऽथाऽऽदिमो यामो रजन्याः घटिकाग्रहे ।
वत्सराजं विमुच्याऽऽत्मस्थाने सोऽगान्निजाऽऽलयम् ॥ ८६ ॥
जजल्प भूपतिः कोऽत्र स्थाने प्राहारिकोऽस्ति भोः ! ।
सोऽवदद् वत्सराजोऽहं तिष्ठामि तव सेवकः ॥ ८७ ॥

---

(१) ख च ठ तथा ।

(२) ट वादितेऽथादिमे यामे । ख घ च ङ वादितः प्रथमो यामो ।
ङ झ वादिते प्रथमे यामे ।

उवाच भूपतिर्भूयः किमेकं प्रेषणं मम ।
करिष्यसीति सोऽवोचदादेशं देहि सत्वरम् ॥ ९८ ॥
राज्ञा प्रोवाच यद्येवं भद्राऽऽदेशस्त्वयेष भोः ! ।
यद् भ्रातुर्देवराजस्य शीर्षं छित्त्वा समानय ॥ ९९ ॥
तथेत्यान्नां गृहीत्वाऽसौ निर्ययौ वाममन्दिरात् ।
दध्यौ च देवराजस्याऽतीव क्रुद्धो महीपतिः ॥ १०० ॥
तनुदारधनद्रोहैः कोपो ह्येवंविधो भवेत् ।
एकोऽपि मन्यवस्त्वेषां मध्याद् बन्धोर्न मे तनौ ॥ १ ॥

यतः—

ये भवन्त्युत्तमा लोके स्वप्रकृत्यैव ते ध्रुवम् ।
अप्यङ्गीकुर्वते मृत्युं प्रपद्यन्ते न चोत्पथम् ॥ २ ॥
भीता जनापवादस्य ये भवन्ति जितेन्द्रियाः ।
अकार्यं नैव कुर्वन्ति ते महामुनयो यथा ॥ ३ ॥
कुविज्ञातं कुदृष्टं वा कुश्रुतं कुपरीक्षितम् ।
नूनमेतद् भावि कार्यं तत्कर्तव्यं मया कथम् ॥ ४ ॥
हुं ज्ञातमथवा कालविलम्बं प्रकरोम्यहम् ।
अशुभस्य निरासाय स एव कथितो बुधैः ॥ ५ ॥
चिन्तयित्वेति भूपस्य समागत्य च सन्निधौ ।
स ऊचेऽद्यापि जागर्ति देवराजो महीपते ! ॥ ६ ॥
जाग्रन्न शक्यते हन्तुं केनाप्येष महाभुजः ।
तमहं मारयिष्यामि जातनिद्राभरं पुनः ॥ ७ ॥

एवं भवतु राज्ञेति प्रपन्ने सोऽवदत् पुनः ।
यूयं विनिद्रा मे काचित् कथां कथयत प्रभो ! ॥ ८ ॥
अथवा कथ्यमानां तां यूयं शृणुत सोद्यमाः ।
इयं हि निर्विनोदानां क्षयं याति न यामिनी ॥ ९ ॥
त्वमेवाऽऽख्याहि भोः ! भद्रेत्यादिष्टः पृथिवीभुजा ।
ततश्चाऽऽख्यातुमारेभे वत्सराजः कथामिमाम् ॥ १० ॥
बहुलोकसमायुक्तं मुक्तभीतिभयादिभिः ।
अस्तीह पाटलीपुत्रं युक्तं भूपशतैः पुरम् ॥ ११ ॥
तत्राभूत् पृथिवीराजो राजा शत्रुविनाशकृत् ।
भूमिमण्डलविख्यातो धार्मिको विनयी नयी ॥ १२ ॥
विनयादिगुणाऽऽधारा सुविचारा मनोहरा ।
आसीद् रत्या समाकारा [1]सुतारा तस्य वल्लभा ॥ १३ ॥
उदारो निर्मलाऽऽचारः सुविचारो दयापरः ।
रत्नसारोऽभिधानेन तत्र श्रेष्ठिवरोऽभवत् ॥ १४ ॥
अनवद्यक्रियाऽऽसक्ता भक्ता देवगुरुष्वलम् ।
सलज्जा रज्जुकानाम्नी तस्याभूद् गृहिणी वरा ॥ १५ ॥
धनदत्तस्तयोः पुत्रः पवित्रः शुभकर्मणा ।
कलाकलापसंयुक्तो विमुक्तो व्यसनाऽऽदिभिः ॥ १६ ॥
सोऽन्यदा कृतशृङ्गारो मित्रबान्धवसंयुतः ।
निर्गत्य मन्दिराद् गन्तुं प्रवृत्तोऽर्थेन केनचित् ॥ १७ ॥

---

(१) घ ज ड द सुभगा ।

तं दृष्ट्वा कश्चिदित्यूचे धन्योऽसौ श्रेष्ठिनन्दनः ।
य एवंविधसामग्र्या स्वेच्छया विलसत्यहो ॥ १८ ॥
सोऽन्येन भणितो मुग्ध ! किमस्य त्वं प्रशंससि ।
यः पित्रोपार्जितां लक्ष्मीं भुङ्क्ते कापुरुषक्रियः ॥ १९ ॥
प्रशंसायाः स योग्योऽत्र यो द्रव्योपार्जने रतः ।
त्यागभोगपरो यश्च लोकमध्ये विजृम्भते ॥ २० ॥
तच्छ्रुत्वा श्रेष्ठिपुत्रोऽसौ चिन्तयामास चेतसि ।
अमुनेर्ष्यापरेणापि जल्पितं मे हितं वचः ॥ २१ ॥
ततो देशान्तरे गत्वा समुपार्ज्य धनं घनम् ।
तत् सर्वं साधयिष्यामि यदनेन विभाषितम् ॥ २२ ॥
स्ववितर्कोऽथ मित्राणामग्रे तेन निवेदितः ।
प्रशंसितश्च तैस्तस्याभिप्रायः प्रियवादिभिः ॥ २३ ॥
लगित्वा पादयोः सोऽथ जगाद जनकं मया ।
अर्थार्जनकृते गम्यं परदेशे त्वदाज्ञया ॥ २४ ॥
वज्राऽऽहत इव श्रेष्ठी दुःखितस्तमभाषत ।
अर्थस्ते विद्यते वत्स ! त्यागभोगक्षमो बहुः ॥ २५ ॥
तेनैव साधनीयानि सर्वकार्याणि निश्चितम् ।
प्राणसन्देहकरणे गम्यं देशान्तरे न हि ॥ २६ ॥
पुनरप्यवदत् पुत्रस्तात ! लक्ष्मीस्त्वयाऽर्जिता ।
जननीव न मे भोक्तुं युज्यते गौरवाहते ॥ २७ ॥
अत्यागग्रहपरं ज्ञात्वा विसमर्ज पिताऽपि तम् ।
ततोऽसौ यानसामग्रीमखिलां प्रगुणां व्यधात् ॥ २८ ॥

ससहायः सपाथेयः समादाय क्रयाणकम् ।
विदधे सार्थसंयुक्तः स शुभेऽह्नि प्रयाणकम् ॥ २९ ॥
कृत्वाऽनुगमनं तस्य किञ्चिदध्वानमञ्जसा ।
श्रेष्ठी निवर्तमानोऽथ शिक्षामेवंविधामदात् ॥ ३० ॥
त्यागिना कृपणेनैव निर्घृणेन दयालुना ।
विदेशगेन भवता भाव्यं शूरतरेण च ॥ ३१ ॥
सर्वथाऽलब्धमध्यस्थं भूया वत्स ! ममाऽऽज्ञया ।
शिक्षां दत्त्वेति वलितः श्रेष्ठी स प्रचचाल च ॥ ३२ ॥
आगच्छाऽऽगच्छ भोः ! अत्र तिष्ठोत्तिष्ठ व्रज द्रुतम् ।
इत्यादिवाक्यतुमुलः सार्थमध्ये तदाऽभवत् ॥ ३३ ॥
[1]श्रीपुरं नगरं प्राप्तस्तत्र चोपसरोवरम् ।
सार्थोऽस्थात् सार्थनाथस्तु रम्ये पटकुटीतटे[2] ॥ ३४ ॥
तदैकः कम्पमानाङ्गो भयात् चञ्चललोचनः ।
पुरुषः शरणं कञ्चिद् धनदत्तमुपाश्रितः ॥ ३५ ॥
तेनैवं भणितः सोऽथ मा भैषीस्त्वं कुतोऽपि भोः ! ।
महत्यद्यापराधेऽपि मत्समीपमुपागतः ॥ ३६ ॥
अत्रान्तरे हत हतेतिवदन्त उदायुधाः ।
आरक्षकनरा एत्य सार्थवाहमदोऽवदन् ॥ ३७ ॥
दासोऽयं नरनाथस्य तस्याऽऽभरणमुत्तमम् ।
गृहीत्वा हारयामास द्यूतकारस्य सन्निधौ ॥ ३८ ॥

---

(१) ख घ ङ श्रीपुरे नगरे प्राप्ते त-।
(२) ङ ज द -गृहे ।

तद् विलोक्य महीभर्तुरस्माभिः प्रतिपादितम् ।
तेनापि वध्य आदिष्टो द्रोहकारीति रोषतः ॥ ३८ ॥
ततो दयाप्रपन्नेन मन्त्रिणेत्युदितो नृपः ।
गुप्तौ तिष्ठत्वसौ तावद् यावन्नाऽऽभरणागमः ॥ ४० ॥
ततः कारागृहे क्षिप्तो रजन्याः प्रहरेऽन्तिमे ।
भङ्क्त्वा तदारक्षकं च हत्वाऽप्येष विनिर्ययौ ॥ ४१ ॥
विज्ञाय वयमप्यस्य पृष्ठे शीघ्रं प्रधाविताः ।
एषोऽस्य सरसः प्रत्यासन्ने गूढवनेऽविशत् ॥ ४२ ॥
ततोऽधुना विनिर्गत्य प्रविष्टः शरणे तव ।
तदयं मुच्यतां राजापथ्यकारी महामते ! ॥ ४३ ॥
उवाच सार्थवाहोऽपि यद्यप्येवं तथाऽपि भोः ! ।
सतां नार्पयितुं युक्तः कदाऽपि शरणाऽऽगतः ॥ ४४ ॥
आरक्षका वदन्ति स्म राजादेशकरा वयम् ।
सोऽवदत् तर्हि राजानं गत्वा विज्ञापयाम्यहम् ॥ ४५ ॥
एवमस्त्विति तैरुक्ते सोऽगात् नृपतिसन्निधौ ।
तस्य रत्नाऽऽवलीं चैकां महामूल्यामढौकयत् ॥ ४६ ॥
राज्ञा सोऽभाणि सार्थेश ! कुत आगमनं तव ।
तेनापि कथितस्तस्य वृत्तान्तश्च सविस्तरः ॥ ४७ ॥
इति चोक्तं महाराज ! लब्धमाभरणं यदि ।
तदसौ मुच्यतां मेऽद्य तस्करः शरणागतः ॥ ४८ ॥
राजा प्रोवाच लब्धेऽपि भूषणे वधमर्हति ।
यद्यप्येष तथाऽप्यद्य मुक्तः प्रार्थनया तव ॥ ४९ ॥

महाप्रसाद इत्युक्त्वा निजस्थानमगादसौ ।
आरक्षकनरास्ते च राजदूतेन वारिताः ॥ ५० ॥
भोजनं कारयित्वाऽथ तस्करोऽप्यात्मना सह ।
इत्युक्तो धनदत्तेन मैवं कार्षीद् भवान् पुनः ॥ ५१ ॥
सोऽवदद् विनिवृत्तोऽस्मि चौर्यात् सार्थेश ! संप्रति ।
करिष्यामि व्रतं किञ्चिद् हितं स्वस्य प्रियाय ते ॥ ५२ ॥
अन्यश्च साधुना दत्तो भूतनिग्रहकारकः ।
मन्त्रः सप्रत्ययो मेऽस्ति ग्राह्योऽवश्यमसौ त्वया ॥ ५३ ॥
जगृहे प्रार्थनाभङ्गभीरुणा सार्थपेन सः ।
तस्करोऽपि तमापृच्छ्य ययौ स्वेप्सितहेतवे ॥ ५४ ॥
दत्तं प्रयाणकं शीघ्रं धनदत्तेन चाग्रतः ।
गच्छन् क्रमेण संप्राप्तोऽटवीं कादम्बरीमसौ ॥ ५५ ॥
एकस्याश्च महानद्या रोधस्यावासितोऽथ सः ।
तत्र प्रकर्तुमारब्धा सामग्री भोजनादिका ॥ ५६ ॥
अत्रान्तरे च सार्थेशो व्याधमेकं ददर्श सः ।
कृष्णरक्तेक्षणं चापबाणव्यापृतपाणिकम् ॥ ५७ ॥
सारमेयसमायुक्तं रुदन्तं च सुदुःखितम् ।
किमेतदिति तं दृष्ट्वा पप्रच्छ च कृताग्रहः ॥ ५८ ॥
सोऽवोचत् शृणु भो भद्र ! मम दुःखस्य कारणम् ।
इहास्ति पर्वते भिल्लपल्लीगिरिकुडङ्गिका ॥ ५९ ॥
तत्र पल्लीपतिः शूरो विख्यातः सर्वभूभुजाम् ।
सिंहचण्डोऽभिधानेन प्रचण्डो रणकर्मणि ॥ ६० ॥

तस्य सिंहवती भार्या जीवितादपि वल्लभा ।
वर्तते प्राणमन्देहे मा भूतग्रहपीडया ॥ ६१ ॥
पल्लिनाथोऽपि नः स्वामी वियोगेऽस्या मरिष्यति ।
एतेन कारणेनाहं दुःखितो भद्र ! रोदिमि ॥ ६२ ॥
सार्थवाहस्ततोऽवादीदेकवारमहं दृगा ।
पश्यामि तां यतो मेऽस्ति मन्त्रो भूतग्रहापहः ॥ ६३ ॥
तेनाथ पल्लिनाथस्याऽऽचख्ये तत्तोऽपि सत्वरम् ।
प्रेयसीं तां समादाय तत्समीपमुपाययौ ॥ ६४ ॥
विलोक्य सार्थवाहोऽपि कृत्वा च सकलाकृतिम् ।
मन्त्रजापविधानेन निर्दोषां विचकार ताम् ॥ ६५ ॥
जीवदानोपकारं तं कृत्वा पल्लीपतिः स तु ।
विसृष्टः सार्थवाहेन स्वपल्लीं पुनरप्यगात् ॥ ६६ ॥
वलितो धनदत्तोऽपि ततः स्थानात् शनैः शनैः ।
वेलाकूलगतं प्राप गम्भीराख्यं पुरं वरम् ॥ ६७ ॥
कृत्वा निवेशं सार्थस्य तस्युपस्तत्र पत्तने ।
न मनोवाञ्छितो लाभो बभूवास्य कथञ्चन ॥ ६८ ॥
ततोऽसौ चिन्तयामास पाश्चात्यप्रहरे निशः ।
अर्जयिष्याम्यहं वित्तमागाह्य सरितां पतिम् ॥ ६९ ॥
इति चिन्तापरस्यास्य विगता सा विभावरी ।
ततश्चोत्थाय शय्याया वेलाकूलमियाय सः ॥ ७० ॥
रङ्गत्तरङ्गमालाभिरभ्युत्थान इवोत्थितम् ।
विधिज्ञः पूजयामास सार्थवाहः सरित्पतिम् ॥ ७१ ॥

महद्गुणगणाऽऽधारं धीवराऽध्यासितं तथा ।
सार्थं सितपटीस्फीतं संसाराम्बुधितारकम् ॥ ७२ ॥
देवताऽधिष्ठितं जैनवाक्यवन्नैगमान्वितम् ।
तत्रैकं स्वीकृतं तेन यानं द्रव्येण सुन्दरम् ॥ ७३ ॥ (युग्मम्)
तत्र संक्रामितं भाण्डं योग्यं देशान्तरस्य यत् ।
आरूढश्च स्वयं श्रेष्ठिसुतो वेलासमागमे ॥ ७४ ॥
[1]ततोऽनुकूलपवनप्रेरितं गुरुरंहसा ।
ययौ महासमुद्रे तदतीत्य बहुयोजनीम् ॥ ७५ ॥
गृहीताम्रफलं वक्त्रे समायान्तं विहायसा ।
ददर्शैकमथान्येद्युः राजकीरमसौ पुरः ॥ ७६ ॥
परिश्रमवशादेनं पतन्तं वारिधेर्जले ।
धारयित्वाऽऽत्मनः पार्श्वे धीवरैरानिनाय च ॥ ७७ ॥
जलवाताऽऽदिदानेन स्वस्थीभूतः क्षणेन सः ।
मुक्त्वा चञ्चुपुटादाम्रफलं कीरवरोऽवदत् ॥ ७८ ॥
सार्थाधिनाथ ! ते नैवोपकर्तुं शक्यते मया ।
जीवितव्यप्रदानं यत् त्वया चक्रे ममाधुना ॥ ७९ ॥
जीवितं ददता मेऽद्य साधो ! जीवापितौ त्वया ।
महत्तजीवनावन्धौ वृद्धौ मत्पितरावपि ॥ ८० ॥
ततः किमुपकुर्वेऽहं तवातुल्योपकारिणः ।
तथाऽप्येतत् मयाऽऽनीतं फलं चूतस्य गृह्यताम् ॥ ८१ ॥

---

(१) ख घ ङ वेलाऽनुकूल-।

सार्थवाहोऽब्रवीद् भद्र ! किमेतेन करोम्यहम् ।
भक्ष त्वमेव यच्छामि भक्ष्यमप्यन्यदात्मनः ॥ ८२ ॥
शुकः प्रोवाच सार्थेश ! सुदुष्प्रापमिदं फलम् ।
अनेकगुणकारि स्यात् शृणुतामत्र कारणम् ॥ ८३ ॥
अस्त्यत्र भारते वर्षे विन्ध्यो नाम महीधरः ।
गजेन्द्रभग्नदेवद्रुगन्धव्याप्तदिगन्तरः ॥ ८४ ॥
प्रसिद्धा विद्यते विन्ध्याऽटवी तस्य समीपगा ।
तत्रैकस्मिन् द्रुमे कोरमिथुनं मञ्जुभाषकम् ॥ ८५ ॥
तयोः सूनुरहं तौ चानेऽमूकौ बभूवतुः ।
वृद्धत्वाच्च तयोर्भक्ष्यमानीय प्रददाम्यहम् ॥ ८६ ॥
अन्येद्युरटवी[1]प्रान्तवने चूतद्रुमे वरे ।
यावदस्मि समारूढस्तावत् तत्र समाययौ ॥ ८७ ॥
सुसाधुयुगलं तच्च कृत्वा दिगवलोकनम् ।
निःशङ्कं विजनत्वेन वार्तामेवंविधां व्यधात् ॥८८॥ (युग्मम्)
अस्ति मध्ये समुद्रस्य पादे शैलस्य कस्यचित् ।
प्ररूढः सहकाराख्यः सहत्तः सफलः सदा ॥ ८९ ॥
तस्यैकमपि योऽश्नाति फलं तस्य शरीरतः ।
नश्यन्ति व्याधयः सर्वे[2]ऽपमृत्युश्च जरा तथा ॥ ९० ॥
सौभाग्यमतुलं रूपं दीप्तिः कान्तिश्च जायते ।
सत्फले भक्षिते तस्मिन्नेकवारमपि स्फुटम् ॥ ९१ ॥

---

(१) ग च ज ठ प्राप्त- । क -प्राप्तो । (२) इ -ऽल्पमृत्युश्च ।

तदाकर्ण्य मयाऽचिन्ति सत्यमेतन्न संशयः ।
[1]यद् जायते मुनीन्द्राणां प्रलयेऽप्यन्यथा न गीः ॥ ९२ ॥
ततस्तत्फलमानीय पितृभ्यां प्रददाम्यहम् ।
येनैतौ तरुणावस्थौ जायेते [2]च सुचक्षुषौ ॥ ९३ ॥
चिन्तयित्वेति सार्थेश ! गत्वा तत्र मया [3]द्रुतम् ।
फलमेतत् समानीतं तदिदं भद्र ! गृह्यताम् ॥ ९४ ॥
अहमन्यत् समानीय पित्रोर्दास्यामि तत्फलम् ।
भवता ग्राह्यमेवेदं ममानुग्रहहेतवे ॥ ९५ ॥
ततश्च सार्थवाहेन विस्मयोत्फुल्लचक्षुषा ।
जगृहे तत्फलं कीरोऽप्युत्पपात नभस्तले ॥ ९६ ॥
बह्वनामुपकाराय देयं कस्यापि भूपतेः ।
फलमेतदिति ध्यात्वा गोपितं सार्थपेन तत् ॥ ९७ ॥
परकूलमथान्येद्युः प्राप्तं प्रवहणं ततः ।
दत्त्वाऽऽवासं गृहीत्वा चोपायनं श्रेष्ठिनन्दनः ॥ ९८ ॥
ययौ भूमिपतेः पार्श्वे ढौकयित्वाऽथ प्राभृतम् ।
तत्फलं चार्पयामास परमार्थं निवेद्य तम् ॥९९॥ (युग्मम्)
परितुष्टो मुमोचाथ शुल्कमस्याखिलं नृपः ।
महाप्रसाद इत्युक्त्वा निजाऽऽवासमगादसौ ॥ २०० ॥

---

(१) घ च ज झ, संजायते ।
(२) ख घ झ, दिव्यचक्षुषौ ।
(३) घ च छ -ऽद्भुतम् ।

विक्रीयाधिकलाभेन भाण्डमादाय चापरम् ।
वलित्वा च स संप्राप्तो गम्भीराख्यं पुरं [1]ततः ॥ १ ॥
ततश्च प्रस्थितः प्राप्तोऽटवीं काद्म्बरीं क्रमात् ।
दत्त्वाऽऽवासं च तत्रास्थात् मलोकः [2]सार्थवाहकः ॥ २ ॥
सुप्तेषु सार्थलोकेषु रात्रौ भाण्डोत्करात् बहिः ।
यामिकेषु च जाग्रत्सु यद् जातं तद् निगद्यते ॥ ३ ॥
परिगलितायां रात्रौ लोकैः शुश्रुविरे स्वराः ।
खरा हतहतेत्युच्चैस्तुमुलेन विमिश्रिताः ॥ ४ ॥
उत्तालकाहलारावहक्कानादभयङ्करी ।
कुतोऽप्यतर्किता तत्र भिल्लधाटी समाययौ ॥ ५ ॥
सन्नद्ध सार्थवाहो [3]ऽपि सुभटैः परिवारितः ।
योद्धुं सह तया वीरो डुढौके भिल्लसेनया ॥ ६ ॥
पपाठात्रान्तरे बन्दी गुरुदेवार्चने रतः ।
निर्भयः स्थिरचित्तश्च धनदत्तो जयत्वयम् ॥ ७ ॥
निशम्य धनदत्तस्याभिधां पूर्वोपकारिणः ।
साग्रङ्गः पल्लिनाथोऽथ रणात् पत्तीन् न्यवारयत् ॥ ८ ॥
ज्ञात्वा नरप्रयोगेण तदुदन्तं यथातथम् ।
विशस्त्रो मिलनायास्य सम्मुखश्च ययावसौ ॥ ९ ॥
धनदत्तोऽपि विज्ञाय तमुवाच ससंभ्रमः ।
अहो कृतज्ञतासार ! स्वागतं स्वागतं तव ॥ १० ॥

---

(१) ख घ च पुनः । (३) क ख ट -ऽथ ।
(२) ख ग घ च सार्थनायकः ।

तावन्योऽन्यं समाश्लिष्य निविष्टावुचितासने ।
ताम्बूलाद्यौचितीं तस्य सार्थनाथश्चकार सः ॥ ११ ॥
क्षेमवार्तां च पप्रच्छ प्रत्यूचे सोऽपि किं मम ।
पृच्छ्यते येन विदधे प्रतिपत्तिस्त्ववेट्टशी ॥ १२ ॥
इत्याद्यात्मानमानिन्याऽभ्यर्थयित्वाऽथ सार्थपम् ।
आनिनाय निजां पल्लीं पल्लिनाथोऽप्युदारधीः ॥ १३ ॥
स्नानभोजनवस्त्राऽऽद्यैस्तं संमान्य गृहाऽऽगतम् ।
मुक्ताफलेभदन्ताद्यैः पूजयामास चाऽऽदरात् ॥ १४ ॥
ततस्तं समनुज्ञाप्य गृहीत्वा वसु किञ्चन ।
स सार्थसहितोऽचालीत् प्राप्तश्च नगरं निजम् ॥ १५ ॥
प्रविश्य धनदत्तोऽथ महाभूत्या निजे पुरे ।
स्वभुजोपात्तवित्तेन विदधे स्वविचिन्तितम् ॥ १६ ॥
ददौ दानानि पात्रेषु सत्रक्रे च सुवासिनीः ।
गुरूंश्च पूजयामासाकारयत् कीर्तनानि च ॥ १७ ॥
चकार चान्यदप्यात्मचिन्तितं विभवेन सः ।
तत्र सूरिवरोऽन्येद्युर्विहरन् कश्चिदाययौ ॥ १८ ॥
तत्पार्श्वे धर्ममाकर्ण्य स भूत्वा च महाव्रती ।
प्राप्तः क्रमेण निष्कर्मा निर्वाणपद[1]मव्ययम् ॥ १९ ॥
इतो नरवरेन्द्रोऽसौ गृहीत्वाऽऽम्रफलं करे ।
दध्यौ स्वयं प्राशितेन किमेतेन भवेद्गुणः ॥ २० ॥

---

(१) ख ग घ ज -सुत्तमम् ।

बहुशः कारयित्वाऽहममून्यास्रफलानि चेत् ।
करोमि बहु लोकस्योपकारं तद् महान् गुणः ॥ २१ ॥
ध्यात्वेत्याज्ञापयामास भूपतिः पुरुषान् निजान् ।
वप्यमेतत् शुभस्थाने महकारो भवेद् यथा ॥ २२ ॥
[1]ततस्तैर्विदधे पुम्भिर्गत्वाऽऽरामे मनोहरे ।
पाय्यते स्म जलं कृत्वाऽऽलवालं परितोऽस्य हि ॥ २३ ॥
तैश्च संप्रीणितो राजा पूर्वं तस्याङ्कुरोद्गमे ।
प्रत्यहं नवनवर्द्धिकथनाच्च ततः परम् ॥ २४ ॥
क्रमाच्चूतवरे तस्मिन् पुष्पिते फलिते सति ।
यत्नतो रक्षणीयोऽयमिति राज्ञोदिता नराः ॥ २५ ॥
एवं तेषु प्रकुर्वत्सु प्रसुप्तेष्वन्यदा निशि ।
तस्य दैववशेनैकं पतति स्म फलं भुवि ॥ २६ ॥
तत् प्रभाते महीभर्तुः प्रहृष्टैस्तैः समर्पितम् ।
देयं पात्राय कस्मैचिदिदं चिन्तयति स्म सः ॥ २७ ॥
आकार्य देवशर्माणं चतुर्वेदधरं द्विजम् ।
अमृतास्रफलं तस्मै भक्तिपूर्वं ददौ नृपः ॥ २८ ॥
सोऽप्यात्ममन्दिरे गत्वा पूजयित्वा च देवताम् ।
तत्फलं भक्षयामास पञ्चत्वं समवाप च ॥ २९ ॥
केनचित् कथितं राज्ञो देवशर्माऽद्य स द्विजः ।
अमृतास्रफले तस्मिन् भक्षिते संस्थितः प्रभो ! ॥ ३० ॥

---

(१) क ख ङ ट. तैस्तथा ।

सखेदोऽथ नृपः स्माहाहो अकार्यं कृतं मया ।
पातकं ब्रह्महत्याया धर्मभ्रान्त्या यदर्जितम् ॥ ३१ ॥
नूनमेष विषस्यास्रः प्रपञ्चं प्रविधाय तम् ।
मम प्राणविनाशाय केनचित् प्रेषितोऽरिणा ॥ ३२ ॥
ततोऽयं स्वयमुप्तोऽपि पालितोऽपि प्रयत्नतः ।
बहुप्राणित्तयङ्कारी छिद्यतां विषपादपः ॥ ३३ ॥
राजादिष्टनराः तीक्ष्णकुठारैस्तरुपुङ्गवम् ।
मूलादपि तमाच्छिद्य पातयन्ति स्म भूतले ॥ ३४ ॥
निर्विण्णा जीवितस्याथ कुष्टरोगार्दिता जनाः ।
धावितास्तत् समाकर्ण्य विषाऽऽम्रतरुच्छेदनम् ॥ ३५ ॥
कश्चित् पक्वमपक्वं वाऽर्द्धपक्वं चाऽपरस्तथा ।
तत्फलं भक्षयामास सुखमृत्युविधित्सया ॥ ३६ ॥
तस्मिन् चूतफले चाऽऽत्ते गतरोगव्यथाः क्षणात् ।
अभूवंस्ते जनाः सर्वेऽप्यमृताशनसन्निभाः ॥ ३७ ॥
दृष्ट्वा तान् विस्मयाऽऽपन्नः चिन्तयामास भूपतिः ।
अहो असदृशफलं फलमस्य तरोः कथम् ॥ ३८ ॥
[1]गतरोगाः कामतुल्याः संजाता यद्यमी जनाः ।
यजनादिक्रियाऽऽसक्तः तर्हिप्रोऽयं कथं मृतः ॥ ३९ ॥
[2]व्याहार्याऽऽरक्षकान् तस्यापृच्छत् तच्चूतजं फलम् ।
त्रोटितं किं नु युष्माभिर्गृहीतं वा धरागतम् ॥ ४० ॥

---

(१) ङ ट ढ गतकल्याः । (२) ठ आकार्य्य ।

तैश्च मत्ये समाख्यातं राजोचेऽहिविषेण तत् ।
लिप्तं भावि बहिस्तेन विषवोऽयं द्विजोत्तमः ॥ ४१ ॥
अकार्यमविचार्येदं धिगहो विहितं मया ।
यदमी छेदितो रोषात् तरुराजः सुधामयः ॥ ४२ ॥
अकारि सहसा कार्यं यथा तेनापरोचितम् ।
तथाऽन्येन न कर्तव्यं महीनाथ ! सुखैषिणा ॥ ४३ ॥
द्वितीयप्रहरेऽतीते निशाया वासमन्दिरात् ।
निर्ययौ वत्सराजोऽत्र प्रविष्टस्तस्य चानुजः ॥ ४४ ॥
राजा दध्यावहो रम्यं कथयित्वा कथानकम् ।
मम कार्यमकृत्वैव वत्सराजो गृहं ययौ ॥ ४५ ॥
अथ दुर्लभराजोऽपि तथैव भणितोऽमुना ।
प्रत्युत्पन्नमतिः सोऽपि गत्वाऽऽगत्याऽवदद् नृपम् ॥ ४६ ॥
नृनाथ ! जाग्रतोऽद्यापि तौ द्वावपि ममाग्रजौ ।
तत् प्रतीक्ष्य क्षणं कार्यं साधयिष्यामि तावकम् ॥ ४७ ॥
राजन् ! कथानकं किञ्चित् कथ्यतां शृणुताथवा ।
इत्युक्ते तेन सोऽवादीत् त्वमप्याख्याहि तन्मम ॥ ४८ ॥
उवाच दुर्लभोऽचैव भरते पर्वतोपरि ।
अस्ति राजपुरं नाम पुरमद्भुतमङ्गलम् ॥ ४९ ॥
तत्राऽभूद् भूपतिः शत्रुदमनोऽन्वर्थसंज्ञितः ।
रत्नमालाऽभिधा तस्य महिषी प्रेमसंयुता ॥ ५० ॥
अन्यदा तस्य भूपस्याऽऽस्थानाऽऽसीनस्य सन्निधौ ।
आजगाम बटुः कश्चित् प्रतीहारनिवेदितः ॥ ५१ ॥

व्यग्रत्वाद् भूपतेः सोऽथोपविश्यास्थाद् नृपस्तथा[1] ।
विसृज्याऽऽस्थानमभ्यङ्गस्नाने चक्रे श्रमापहे ॥ ५२ ॥
देवपूजनवेलायामथ तस्य महीपतेः ।
सपुष्पवटुरागत्य प्रसूनानि समार्पयत् ॥ ५३ ॥
कस्त्वं भद्रेति राज्ञोक्तः सोऽवोचद् यज्ञदत्तसूः ।
अहं शुभङ्करो नाम्ना विप्रोऽरिष्टपुरस्थितिः ॥ ५४ ॥
निजगेहाद् विनिर्गत्य देशदर्शनकौतुकी ।
भ्रमन्निह समायातः समीपे ते महीपते ! ॥ ५५ ॥
प्रकृत्या विनयी सोऽथ स्वसमीपे [2]महीभुजा ।
स्थापितस्तत्र निश्चिन्तस्तस्थौ चापि शुभङ्करः ॥ ५६ ॥
शूरस्त्यागी प्रियाभाषी कृतज्ञो दृढसौहृदः ।
विज्ञानी स्वामिभक्तश्च स सर्वगुणमन्दिरम् ॥ ५७ ॥
[3]अतिगौरवतो राज्ञा शुद्धान्तादिष्ववारितः ।
सर्वत्राऽस्खलितो जज्ञे गुणवान् स शुभङ्करः ॥ ५८ ॥
अन्यदा नगरस्याऽस्य समीपे हरिराययौ ।
व्याध एकः समागत्य तमाचख्यौ महीपतिम् ॥ ५९ ॥
सेनया चतुरङ्गिण्या संयुक्तः सशुभङ्करः ।
वधार्थं मृगराजस्य निर्ययौ नगराद् नृपः ॥ ६० ॥
ज्ञात्वाऽथ व्याधवचनात् तं सिंहं वनमध्यगम् ।
वनाद्बाक् स्थापयामास सैनिकानखिलान्नृपः ॥ ६१ ॥

---

(१) ख ङ ट नृपस्तदा । (२) घ, च भूभुजा ।
(३) ख घ दृतो गौरवितो । ज ट अतिगौरवितो ।

Mārkaṇḍēya Purāṇa, (English) Fasc. 1–9 @ 1/- each ...	Rs. 9	0
•Markandeya Purana, Fasc. 5-7 @ /10/ each	1	14
•Mīmāṁsā Darçana, Fasc. 10–19 @ /10/ each	6	4
Nyāyavārtika, Fasc. 1–6 @ /10/ each	3	12
•Nirukta, Vol. IV, Fasc. 1–8 @ /10/ each	5	0
•Nitisara, Fasc. 3-5 @ /10/ each	1	14
Nityācārapaddhatiḥ, Fasc. 1–7 @ /10/ each	4	6
Nityācārapradīpaḥ Vol. I, Fasc. 1–8 ; Vol. II, Fasc. 1-2. @ /10/ each ...	6	4
Nyayabinduṭikā, Fasc. 1 @ /10/ each	0	10
•Nyāya Kusumāñjali Prakaraṇa Vol. I, Fasc. 2–6 ; Vol. II, Fasc. 1–3 @ /10/ each	5	0
Padumawati, Fasc. 1–5 @ 2/	10	0
•Pariçiṣṭa Parvan, Fasc. 3–5 @ /10/ each	1	14
Prākrita-Paingalam, Fasc. 1–7 @ /10/ each	4	6
Prithivirāj Rāsa. Part II, Fasc. 1–5 @ /10/ each	3	2
Ditto (English) Part II, Fasc. 1 @ 1/-	1	0
Prākrta Lakṣaṇam Fasc. 1 @ 1/8/ each	1	8
Parāçara Smṛti, Vol. I, Fasc. 1–8 ; Vol. II, Fasc. 1–6 ; Vol III, Fasc. 1–6 @ /10/ each	12	8
Parāçara, Institutes of (English) @ 1/- each	1	0
Pariksamukha Sutram	1	0
Prabandhacintāmaṇi (English) Fasc. 1–3 @ 1/4/ each	3	12
Rasarnavam, Fasc. 1-2	2	8
Saddarsana-Samuccaya, Fasc. 1-2 @ /10/ each	1	4
•Sāma Vēda Saṁhitā, Vols. I, Fasc. 7–10 ; II, 1-6 ; III, 1–7 ; IV, 1–6 ; V, 1–8, @ /10/ each	19	6
Samaraicca Kaha Fasc. 1-2, @ /10/	1	4
Sāṅkhya Sūtra Vṛtti, Fasc. 1–4 @ /10/ each	2	8
Ditto (English) Fasc. 1–3 @ 1/- each	3	0
•Sankara Vijaya, Fasc. 2-3 @ /10/ each	1	4
Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each	3	12
Sragdharā stotra (Sanskrit and Tibetan)	2	0
Srauta Sutra Latyayan, Fasc. 4-9 @ /10/ each	3	12
„ „ Asbalayana, Fasc. 4-11 @ /10/ each	5	0
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ 1/- each	1	0
Suddhikaumudī, Fasc. 1-4 @ /10/ each	2	8
•Taittreya Brahmana, Fasc. 11-25 @ /10/ each	0	6
„ Pratisakhya, Fasc. 1-3 @ /10/ each	1	14
•Taitterîya Saṁhitā, Fasc. 27–45 @ /10/ each	11	14
Tāṇḍya Brāhmaṇa, Fasc. 10–19 @ /10/ each	6	
Tantra Vārteka (English) Fasc. 1-6 @ 1/4/ each	7	
Tattva Cintāmaṇi, Vol. I, Fasc. 1–9, Vol II, Fasc. 2–10, Vol. III, Fasc. 1–8, Vol. IV, Fasc. 1, Vol. V, Fasc. 1–5, Part IV, Vol. II, Fasc. 1-12 @ /10/ each		
Tattvārthadhigama Sutram, Fasc. 1-3 @ /10/ each		
Trikāṇḍa-Maṇḍanam, Fasc. 1-3 @ /10/ each		
Tul'si Satsai, Fasc. 1–5 @ /10/ each		
Upamita-bhava-prapañca-kathā, Fasc. 1, 5-13 @ /10/ each		
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ 1/- each		
Vallāla Carita, Fasc 1 @ /10/	0	
Varṣa Kriyā Kaumudī, Fasc 1–6 @ /10/ each	3	
•Vāyu Purāṇa, Vol. I, Fasc. 3–6 ; Vol. II, Fasc. 1–7, @ /10/ each ...	6	14
Vidhāna Pārijata, Fasc. 1–8 Vol- II. Fasc. I @ /10/ each	5	10
Ditto Vol. II, Fasc. 2-3 @ 1/4/	2	8
Vivādaratnākara, Fasc. 1–7 @ /10/ each	4	6
Vṛhat Svayambhū Purāṇa, Fasc. 1–6 @ /10/ each	3	12
•Yoga Aphorisms of Patanjali, Fasc. 3–5 @ /10/ each	1	14
Yogaśāstra of Hemchandra Vol. I. Fasc. 1-2	2	8

Tibetan Series.

Bandhyastotrasangraha, Vol. I	2	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1–4 @ 1/- each	4	0
Nyayabindu of Dharmakirti, Fasc. 1	1	0
Pag-Sam S'hi Ṭiḥ, Fasc. 1–4 @ 1/- each	4	0
Rtogs brjod dpag bkhri S'iḥ (Tib. & Sans. Avadāña Kalpalatā) Vol. I, Fasc. 1–6 ; Vol. II. Fasc. 1–5 @ 1/- each	11	0
Sher-Phyin, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-3 ; Vol. III, Fasc. 1-6, @ 1/ each	14	0

Arabic and Persian Series.

'Ālamgirnāmah, with Index, (Text) Fasc. 1–13 @ /10/ each	8	2
Al-Muqaddasi (English) Vol. I, Fasc. 1–3 @ 1/- each	3	0
Āin-i-Akbarī, Fasc. 1-22 @ 1/8/ each	33	0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5, @ 2/- each	34	0

•The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Akbarnāmah, with Index, Fasc. 1–37 @ 1/8/ each	Rs. 55	8
Ditto (English) Vol. I, Fasc. 1–8 ; Vol. II, Fasc. 1-6 @ 1/4/ each	17	8
Arabic Bibliography, by Dr. A. Sprenger, @ /10/	0	10
*Bādshāhnāmah, with Index, Fasc. 1–19 @ /10/ each	11	14
Conquest of Syria, Fasc. 1-9 @ /10/ each	5	10
Catalogue of Arabic Books and Manuscripts, 1-2 @ 1/- each	2	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ each	31	8
Farnang-i-Rashīdi, Fasc. 1–14 @ 1/8/ each	21	0
Fihrist-i-Ṭūsī. or, Ṭūsy's list of Shy'ah Books, Fasc. 1–4 @ 1/- each ...	4	0
Futūḥ-u<u>gh</u>-Shām of Wāqidī, Fasc. 1–9 @ /10/ each	5	10
Ditto of Āzādi, Fasc. 1–4 @ /10/ each	2	8
History of Gujarat	1	0
Haft Asmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each ...	0	12
History of the Caliphs, (English) Fasc. 1–6 @ 1/4/ each	7	8
Iqbālnāmah-i-Jahāngīrī, Fasc. 1–3 @ /10/ each	1	14
Iṣābah with Supplement, 51 Fasc. @ 1/- each	51	0
Ma'āṣir-i-' Ālamgīrī, Fasc 1–6 @ /10/ each	3	12
Maāṣir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9 ; Vol. III, 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. II, Fasc. 10-12 ; Index to Vol. III, Fasc. 11-12 @ /1/ each	35	0
Maghāzi of Wāqidī, Fasc. 1–5 @ /10/ each	3	2
Muntakhabu-t-Tawārikh, Fasc. 1–15 @ /10/ each	9	6
Ditto (English) Vol. I, Fasc. 1–7 ; Vol. II, Fasc. 1–5 and 3 Indexes ; Vol. III, Fasc 1 @ 1/ each	16	0
Muntakhabu-l-Lubāb, Fasc. 1- 19 @ /10/ each	11	14
Nukhbatu-l-Fikr, Fasc. 1 @ /10/	0	10
Niẓāmī's Khiradnāmah-i-Iskandari, Fasc. 1–2 @ /12/ each	1	8
Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut. Col. D. C. Phillott	5	0
Riyāzu-s-Salātīn, Fasc 1–5 @ /10/ each	3	2
Ditto (English) Fasc. 1–5 @ 1/	5	0
Tabaqūt-i-Nāṣirī, (English), Fasc. 1-14 @ 1/- each	14	0
Ditto Index	1	0
Tārīkh-i-Fīrūz Shāhi of Ziyāu-d-dīn Barni Fasc. 1–7 @ /10/ each ...	4	6
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāi Aif, Fasc. 1–6 @ /10/ each ...	3	12
Ten Ancient Arabic Poems, Fasc. 1–2 @ 1/8/ each	3	0
Tuzuk-i-Jahāngirī, (Eng) Fasc. 1 @ 1/	1	0
Wis-o-Rāmin, Fasc. 1–5 @ /10/ each	3	2
Zafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /10/ each	10	10

ASIATIC SOCIETY'S PUBLICATIONS.

ASIATIC RESEARCHES. Vols. XIX and XX @ 10/ each	20	0
PROCEEDINGS of the Asiatic Society from 1870 to 1904 @ /8/ per No.		
JOURNAL of the Assiatic Society for 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10 , 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members		

N. B.—The figures enclosed in brakets give the number of Nos. in each Volume.

4.	Journal and Proceedings, N. S., 1905, to date, (Nos. 1-4 of 1905 are out of stock), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.		
5.	Memoirs, 1905, to date. Price varies from number to number. Discount of 25% to Members.		
6.	Centenary Review of the Researches of the Society from 1784-1883 ...	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, Part I, A to E ; Part 2, F to M	4	0
8.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts 1–III, with 8 coloured Plates, 4to. @ 6/ each	18	0
9.	Kaçmīraçabdāmṛta, Parts I & II @ 1/8/	3	0
10.	Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott. ...	10	0
	Notices of Sanskrit Manuscripts, Fasc. 1-34 @ 1/ each	34	0
	Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c. must be made payable to the "Treasurer Asiatic Society," only.

15-12-09.

Books are supplied by V. P. P.

BL 1373 S45A6 1909 v.2

Ajiat Prabhacarya Shantinathacaritram

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY

UTL AT DOWNSVIEW
D RANGE BAY SHLF POS ITEM C
39 15 02 15 07 021 8